पंचतंत्रम्

४६३

४१ पन्नानी

नं० ४५६२६

[illegible]

[illegible]

॥ॐश्रीगणेशायनमः॥ वंदेसरस्वतींदेवींवाङ्मनःकायकर्मभिः वाक्समुद्रोययानद्दोदुस्तर
स्त्रिदशैरपि १ मनवेवाचस्पतयेशुक्रायपराशरायससुताय चाणाक्यायचविष्णुषेन
मोल्कनयशास्त्रकर्तृभ्यः २ प्रणम्यविघ्नहर्त्तारंगणाध्यक्षमनुमास्तुतं नीतिशास्त्रमि
दंवक्ष्येकथामार्गनिवंधनं ३ सकलेशास्त्रसारंजगतिसमलोक्यविष्णुशर्मेदं तंत्रैः
पंचभिरतुसंचकारसुमनोहरंशास्त्रं ४ तद्यथानुश्रूयतेअस्तिदाक्षिणात्येजनपदेमहिर
लारोप्यंनामनगरं तत्रसकलार्थिसार्थकल्पद्रुमः सर्वशास्त्रविशारदः प्रवरनृपमु
कुटमरीचिचयचुंवितचरणकमलः सकलकलापारंगतोऽमरशक्तिनामराजाआ
सीत् तस्यत्रयःपुत्राः परमदुर्मेधसोवसुशक्तिरनेकशक्तिरुग्रशक्तिश्चेवभूवुः

अथतान्शास्त्रपराङ्मुखान्समालोक्यसचिवानाहूयप्रोवाच भोज्ञातमेतद्भिर्ममैते
पुत्राःशास्त्रपराङ्मुखाविवेकरहिताश्च तदेतान्पश्यतोमेमहदपिराज्यंनसौख्य
मावहति यत अजातमृतमूर्खेभ्योमृताजातौसुतौवरं यतस्तौस्वल्पदुःखाययाव
ज्जीवंजडोदहेत तथाच किंतयाक्रीयतेधेन्वायोनसूतेनदुग्धदा कोऽर्थपुत्रेण
जायतेनयोनविद्वान्नधार्मिक २ तदेतेषांबुद्धिप्रबोधनंयथाभवतिकेनाप्युपा
येनानुष्ठेयमिति तत्रैकोप्रोचुः देवद्वादशभिर्वर्षैर्व्याकरणंश्रूयते तद्यदिस
षमपिज्ञायते ततोधर्मशास्त्राणिज्ञायंते ततोबुद्धिप्रबोधनंभवति अथतन्मध्यतः
सुमतिर्नामामात्यःप्राह देवअशाश्वतोऽयंजीवविषयःप्रभूतकालज्ञेयानि:

शब्दशास्त्रात्कालेन तत्संक्षेपमात्रं शास्त्रं किंचिदेतेषां प्रतिबोधनार्थं चिंत्यतामिति ॥ उ
२ क्तं च ॥ अनंतपारं किल शब्दशास्त्रं स्वल्पं तथायुर्बहवश्च विघ्नाः ॥ यत्सारभू
तं तदुपासनीयं हंसैर्यथा क्षीरमिवांबुमध्यात् ॥ १ ॥ तत्रास्ति विष्णुशर्मा नाम
ब्राह्मणः अनेकशास्त्रसंसिद्धसभकीर्तिस्तस्मै समर्पय ॥ एतान्स नूनं द्राक्
प्रबुद्धान्करिष्यति ॥ इति सोपि राजा तदाकर्ण्य विष्णुशर्माणमाहूय प्रोवाच ॥
भो भगवन्मदनुग्रहार्थमेतान्कुमारान् अर्थशास्त्रं प्रति यथा अनन्यसदृशा
न्विदधासि तथा कार्यं ॥ अहं त्वां शासनशतेन नियोजयिष्यामि ॥ अथ विष्णुशर्मा
तं राजानमूचे ॥ देव श्रूयतां ॥ मे तथ्यं वचनं ॥ नाहं विद्याविक्रयं करोमि ॥ ततः स्वना

मत्यागं करोमि। किं वहुना। श्रूयतां ममैष सिंहनादो नाहमर्थलिप्सुर्ब्रवीमि। न च मेऽशी
तिवर्षस्य व्यावृत्तसर्वेन्द्रियार्थस्य किंचिदर्थेन प्रयोजनं। किं तु त्वत्प्रार्थनासिद्ध्यर्थं सर
स्वतीविनोदं करिष्यामि। तल्लिख्यतामद्यतनो दिवसः। यद्यहं षण्मासाभ्यन्तरे
तव पुत्रान्नीतिशास्त्रं प्रत्यनन्यसदृशान्न करोमि ततोऽर्हति देवो देवमार्गं संदर्शयि
तुं। इत्येतां ब्राह्मणस्यासंभाव्यां प्रतिज्ञां श्रुत्वा समन्त्रिको राजा विस्मयान्वितस्तस्मै कुमा
रान्समर्प्य परां निर्वृतिं जगाम। विष्णुशर्मणापि तानादाय स्वगृहं गत्वा तदर्थं। मित्रभे
दः। मित्रसंप्राप्तिः। काकोलूकीयं। लब्धप्रणाशः। अपरीक्षितकारितं चेति पंच तन्त्राणि
रचयित्वा पाठितास्ते राजपुत्राः। तेऽपि तान्यधीत्य मासषट्केन यथोक्ताः संजाताः।

ततःप्रभृति एतत्पंचतंत्रकं नाम नीतिशास्त्रं बालावबोधनार्थं भूतले प्रवृत्तं। किं बहुना
यो चैतत्पठते श्रेयो। नीतिशास्त्रं शृणोति वा। न पराभवमाप्नोति शक्रादपि कदाचन।
कथामुखमेतत्। अथातः प्रारभ्यते मित्रभेदं नाम प्रथमं तंत्रं यस्यायमाद्यः श्लोकः॥
२ वर्द्धमानो महान्स्नेहः सिंहगोवृषभोर्वने। जंबुकेनातिलुब्धेन पिशुनेन विनाशितः॥१॥
तद्यथानुश्रूयते दाक्षिणात्ये जनपदे पुरंदरनगरस्पर्द्धि सर्वगुणसंपन्नं पृथिव्या भू
मणिरत्नभूतं कैलाशशिखराकृति विविधयंत्रप्रहरणावरणपरिपूर्णं गो
द्वालकं विसंकटोत्कटदृढपरिघकपाटतोरणं दुनीलोपेतविपुलद्वारं सुविस्तृतशृं
गाटकचतुष्पथप्रतिष्ठितानेकदेवायतनं परिखापरितोद्धृतहिमगिरिसदृशं। 3

कारप्राकारवलयपरिवेष्टितं महिलारोप्यं नाम नगरं॥ तत्रानेकगुणगणसमन्वितो जन्मांतर
धर्मोपार्जनावाप्तधनसमृद्धो वर्द्धमाननामा सार्थवाहः प्रतिवसति स्म। अथ कदा
चिच्चिंतयतोऽर्द्धरात्रवेलायामीदृशं तस्य चित्तमभूत॥ यथा प्रभूतोपि संचितोऽर्थो व्य
यंऽमानोंऽजनमिव क्षीयते। स्वल्पोपि संचीयमानो वल्मीक इव वर्द्धते॥ अतः प्रभू
तेनापि द्रव्येण तस्य वृद्धिः करणीया। अलब्धा अर्थाः लिप्स्याः। लब्धाः परिरक्षणीयाः। रक्षिता
विवर्द्धनीयाः पात्रे पादनीयाश्चेति। लोकमार्गेण परिरक्ष्यमाणोऽर्थो बहुप्रकारव्ययासक्तो वि
नश्येत॥ अव्ययमानः प्रयोजनोत्पत्तौ तुल्योऽप्राप्त एवेति। ततः प्राप्तस्य सतो रक्षणं विव
र्द्धमानोपभोगादिकार्यं॥ उक्तं च॥ उपार्जितानामर्थानां त्याग एव हि रक्षणं॥ तड

५

गोदरसंस्थानां परीवाहइवांभसां ॥१॥ अर्थैरर्थानि बध्यन्ते गजैरिव महागजाः ॥ नह्यनर्थ
वताशक्यं वाणिज्यं कर्तुमीहया ॥२॥ दैववशादुपपन्ने सति विभवे यस्य नास्ति भोग
श्चानं न च परलोकसमीहा स भवति धनपालको मर्त्यः ॥३॥ एवं संप्रधार्य स मिष्टकाराग
मो निसारमीशानि समाहृत्य सपरिजनः शुभेन नक्षत्रे शुभायां तिथौ गुरुजनानुज्ञा
तः स्वजनैरनुव्रज्यमानः शंखतूर्यनिर्घोषेणाग्रतः क्रीयमाणो नगरान्निः
सृतः ॥ उदकं तावत्सुहृज्जनो निवर्तेत तस्मादभिप्रस्थितः ॥ तस्य च द्वौ मंगलवृषभौ धु
र्यौ दारकेन नंदकसंजीवकनामानौ पांडुराभ्रसंनिकाशौ सुवर्णकिंकिणीपरिष्कृतौ रथो
ति षत्तः ॥ अथ वरवरशिरपलाशशालेभिनो स्पर्शां अन्येष्वेष दर्शनेः श्राखा ॥ मिवि

रंतरोपघितिं॥ अनेकंनगवयमधियरुरुनुमरीवराहशार्दूलचित्रककलभयोद्दंधी अव
लनिम्नवनिगतोदकपरिपूरितां विविधदरीगुहानी अटवीमासाद्य हृयापातितनिर्झरो
दकोत्पादितकर्दममध्ये कचरणवैकल्यात्॥ शकटस्य चातिभारादभिहितः कस्मिंश्चित्प्र
देशे कथमपि नयोः संजीवको युगभंगं कृत्वा निषसाद। ततस्तं निपतितं दृष्ट्वा शाकटि
कः सभ्रमः शकटादुत्तीर्य त्वरितगतिः नाति दूरेणोपचारमंजलिं कृत्वा सार्थवाह
वाचा आर्यपुत्र अद्य परिश्रान्तः संजीवकः पंकनिषसादात्तच्छ्रुत्वा वर्द्धमान सार्थवाहः
परं विषादमगममन्नः॥ पंचरात्रमप्रयाणकं कृत्वा यावदसौ चेतनां न लभेत। तदा तस्य
संजीवकस्य समेनान्ने रक्षापुरुषान्दत्त्वा अभिनिर्वान। यथा संजीवको यदि [illegible] वि।
जी

समागंतव्यं। अथ यदि म्रीयते तदा तं संस्कृत्य पुनः आभिगंतव्यं। एवं समादिश्य यथाभि-
लषितं देशांतरं प्रस्थितः॥ अथ तावपि द्युश्च वकुं याये वन मिति भयात्तेपि गत्वा स्वा-
मि-भयात्तैरपि गत्वा स्वामिने मृषा निवेदितं। यथा स्वामिन् सौ संजीवको ऽस्माभिश्चास्मादि-
नात्सत्कारेण संस्कृतः। इति तत् श्रुत्वा सार्थवाहः क्षणमात्रं दुःखं कृत्वा कृतज्ञतयाव-
मेतत्कृत्यादि क्रीयां कृत्वा मथुरामविघ्नेन संप्राप्तः। अथ संजीवकः स्वभाग्यवशा-
दायुःशेषतया च निर्झरोदकशीकरप्रकरैराश्वासितशरीरः शनैः २ यमुनाक-
च्छमवतीर्णः। तस्मिन् मरकतसदृशानि शष्पलवाग्राणि भक्षयन् कतिपयै-
रहोभिर्हरवृषभ इव पीनः ककुद्मान् बलवांश्च संवृत्तः। प्रत्यहं वल्मीकशि-

खराशिस्त्रृंगाधिरोहणार्थं यमुनाकच्छमवतीर्णः। स च संजीवकस्य महांतं गर्जितं शब्दम
श्रुत्वा। तं च श्रुत्वा अतीव क्षुभितहृदयः स्वीयकारप्रछाद्य मंडलवटस्याधस्ता
त् चतुर्मंडलावस्थाने नावस्थितः। आह च। चतुर्मंडलावस्थाननामानि। सिंहः
सिंहानुयायी। काकरववर्गः। किंवृत्ताश्चेति। मंडलानि तत्र सर्वेष्वेव नगरेषु पत्तनादि
ष्ठानखेरकचतुर्गडप्रत्यंताहारजनस्थाने सेवक एव सिंहस्थानीयो भवति। कति
याः सिंहानुयायिनस्तत्रचराः। काकरववर्गो मध्यवर्गः। किंवृत्तावनीनस्थान
वासेन उत्तममध्यमाधमाय इति। अथ पिंगलकसामात्यसुहृज्जनेष्वेवामर
ष्यजनवाहनविलासस्वविस्तारविरचितमक्षीमसताहं सरसैकांतके दर्पो

इत्त्रमनग्रमानमदोत्सेकमसहमानतयास्वयंग्राहिनिरंकुशैश्वर्यमनक्षिप्तमितरैर्दूसे
६ वितानीकृतप्रणावनतमाममसर्वरोषसंरंभमगाधधिष्ठानमकातरस्वपुरुषार्थमनुसि
ध्वंजनलिप्तमदीनमभीतमकृतचाटुकर्मोपार्यंत्यवसायपौरुषाभिमाना
वष्टब्धमभासुरमनन्यसेविनिःसंगमनात्मंभरिपरोपकारसुखव्यसनपुरुषा
6 कारफलमपरिपूर्णाभूमकृशमनुच्छमपगतदुर्गप्रतिसंस्कारवित्तमगणि
तायव्ययमव्यविलोक्यममनायत्तमहृतोपार्जितप्रतापविभवमनमबाह्यप
सप्रधारणमप्रहरणाभरणसमाधारणविभवग्राममसमपरोक्षवृत्तमनोग्रा
कनीयमनपेक्षितकलत्रपार्ष्णिग्राहासाराक्रंदमनिंद्यमपठितशिक्षिता
६

स्वप्रयोगमन्तेध्याविद्याध्यातपरिजननिरयेस्थलपग्रामनिवाससौहितेवनांतरेनिःशं
केनिःसाध्वसमुच्चैःशिरोराजत्वमनुबभूव।उक्तंच।एकाकिनिवनवासिन्यराजल
क्षणापनीतिशास्त्रज्ञे।सत्वे।त्कटेचमृगपतौराज्ञेगिरःपरिणमन्ति।१।नाभिषेकोन
संस्कारःसिंहस्यक्रियतेमृगैः।विक्रमार्जितचित्तेस्यस्वयमेवमृगेंद्रता।२।सदाम
त्तमदस्यंदिमातंगपिशिताशनः।असंप्राप्तेश्मिताहारस्तृणान्यत्तिनकेसरी।३।
तस्यचदमनककरटकनामानौद्वौशृगालौभ्रष्टाधिकारिणौमंत्रिपुत्रावास्तां
तौचपरस्परंमंत्रयितुमारब्धौ।।तत्रदमनकोब्रवीत्।।भद्रकरटकअयंतावत्
दस्मत्स्वामीपिंगलकउदकग्रहणार्थेइतःप्रवृत्तः।।किंनिमित्तमिहादे

र्मनस्थेनावस्थितः। सोब्रवीत्। भद्र किमनेन व्यापारेण॥ उक्तं च। अव्यापारेषु व्याप-
रं यो नरः कर्तुमिच्छति। स एव निधनं याति कीलोत्पाटीव वानरः॥१॥ दमनक आ-
७ हा कथमेतत्। सोब्रवीत्। अस्ति कस्मिंश्चित्प्रदेशे नगरं। तत्तस्यासन्ने त-
रुखंडमध्ये केनापि वणिजा देवायतनं कार्यते स्म। तत्र ये कर्मकराः स्थपत्या-
दयस्ते मध्याह्नवेलायां आहारार्थं प्रतिदिनं नगरं प्रविशंति। अथैकस्मिन्दि-
ने वानरयूथं तदर्द्धं देवतायतनमायातं। अथैकस्य शिल्पिनोऽर्द्धस्फाटितो
महाप्रमाणोऽर्जुनस्तंभ शिरसि निखात खादिरकीलकोऽवतिष्ठते। वा-
नराश्च स्वेच्छया तरुशिखरप्रासादशृंगदारुनिचयेषु यथेष्ट क्रीडितुमा ७

रव्वा।तत्रैकस्य मन्त्रविनाशः चापलादुपविश्य स्तम्भे केनचिदवस्थाने कीलि
को निखात इति पाणिभ्यां संगृह्योत्पाटयितुमारब्धः। अर्द्धस्फाटितान्तरप्रवि
ष्टवृषणस्य स्थानाच्चलितकीलकेन यद्वृत्तं तद्भवता अनाख्यातमपि विदित
मिति। अतोऽहं ब्रवीमि अव्यापारः प्राज्ञैः परिहर्त्तव्येति॥ पुनस्त्वाब्रवीदावयोस्ता
वद्भक्षितशेषाहारमात्रं वर्त्तनमस्त्येव। दमनक आह। कथमाहारमात्रार्थी के
वलं भवान् प्रधानसेवां कुरुते न विशेषार्थितं साधु वेदमुच्यते। सुहृदामुप
कारकारणाद्द्विषतामप्यपकारकारणात्। नृपसंश्रय इष्यते बुधैर्जठरं
को न बिभर्त्ति केवलं॥१॥ अपि च। यस्मी न जीवति जीवन्ति बहवः स तु जीवतु।

८

वयांसि किं न कुर्वंति चंच्वा स्वोदरपूरणं ॥२॥ यो नात्मने न कुरुते न च बंधुवर्गे दीने
दयां न कुरुते न च भृत्यलोके। किं तस्य जीवितफलं हि मनुष्यलोके काकोऽपि जीव
ति चिरं च बलिं च भुंक्ते ॥३॥ स्वल्पस्नायुवसावशेषमलिनं निर्मांसमप्यस्थिकं श्वा
लब्ध्वा परितोषमेति न च तत्तस्य क्षुधाशांतये। सिंहो जंबुकमंकमागतमपि त्य
क्त्वा निहंति द्विपं सर्वः कृच्छ्रगतोऽपि वांछति जनः सत्त्वानुरूपं फलं ॥४॥ लांगू
लचालनमधश्चरणावपातं भूमौ निपत्य वदनोदरदर्शनं च। श्वा पिंडदस्य कु
रुते गजपुंगवस्तु धीरं विलोकयति चाटुशतैश्च भुंक्ते ॥५॥ सुखरा वै कुनदीव
सुपूरो मूषिकांजलिः॥ सुसंतोषः कापुरुषः स्वल्पकेनापि तुष्यति ॥६॥ स

8

शिव
८

हिताहितविचारशून्यबुद्धेः श्रुतिसमयैर्बहुभिर्बहिःकृतस्य ॥ उदरभरणमात्रमेवाक्षि
श्चोः पुरुषपशोश्च को विशेषः ॥७॥ अथवा ॥ गुरुणा कष्टधुरंधरस्तृणग्रीसमवि
षमेघुलंवालापकवी। जगदुपकरणं पवित्रयोनिर्नरपशुना किमुपमीयते गौ
वैद्रुः ॥८॥ करटक आह। आवां तावदप्रधानौ। किमनेन व्यापारेण। सो ब्रवीत्। भ
द्र किं क्रियतां नाम पि कालेन प्रधानोऽप्रधानो भवति। उक्तं च। अप्रधानः प्रधानः
स्यात्पार्थिवं यदि सेवते। प्रधानोऽप्यप्रधानः स्याद्यदि सेवाविवर्जितः ॥९॥ न क
स्यचित्कश्चिदिह प्रभावाद्भवत्युदारोऽभिमतः खलो वा। लोके गुरुत्वं विपरीततां वा
चस्वचेष्टितैरेव गुणान्नयन्ति ॥ तथा च ॥ आरोप्यशिलाशैलाग्रे यत्नेन भूय।

९ सा॥पात्यन्तेसुखमेवाधस्तथाकार्योशुभक्रिया॥३॥करटकआह॥अथभवान्किं
१ वक्तुंमनाः।सोब्रवीत्।अयंतावदस्मत्स्वामीभीतपरिवारश्च।मूढमनाः सं
तिष्ठते।सोब्रवीत्।कथंभवान्जानाति।दमनकआह।किमत्रज्ञातव्यं।उदी
रितोर्थः पशुनापिनापिगृह्यते हयाश्चनागाश्चवहंतिनोदिताः।अनुक्तम
प्यूहतिपंडितोजनः परेंगितज्ञानफलाहिबुद्धयः॥४॥तथाच॥आ
कारैरिंगितैर्गत्याचेष्टयाभाषणेनच।नेत्रवक्त्रविकारैश्चगृह्यतेंऽतर्गतंम
नः॥५॥तदेष्यनमह्येवात्मप्रज्ञाप्रभावेनवशीकरिष्यामि॥करटकआह॥
अनभिज्ञोभवान्किलसेवाधर्मस्य।तत्कथय।कथमात्मीकरिष्यसि॥सो शिव

ब्रवीत्॥ भद्र कथमहं सेवानभिज्ञो ननु पांडवानां मयैव विराटनगरप्रवेशो व्यास
महर्षेः कथयतः सकालेनुजीविधर्मो विज्ञात इति॥ उक्तं च। कोतिभारः समर्थानां
किं दूरं व्यवसायिनां। को विदेशः सविद्यानां कः प्रियः प्रियवादिनां। करटको
ब्राह॥ कदाचिदयमनुचितस्थानप्रवेशाद्भवंतमवमन्येत। सोब्रवीत्॥ अस्त्ये
वं॥ परं देशकालविदपि॥ उक्तं च। अप्राप्तकालवचनं बृहस्पतिरपि ब्रुवन्नान
केवलमसन्मानं बिप्रियत्वं च गच्छति॥ अपि च॥ अभ्युक्तैरहसिगतं विविक्तम
न्येन मंत्रयेतं वा। उचितप्रणयमपि नरपं सहसा यो नापसर्प्येति॥२॥ तथा च॥
हंह्वालायसमभेयज्ञभोजननारीसनाथ्यसमेयेतु। अनिवारितो न विशेन्नापि

नसमत्रेपिनागसिकः॥गनित्यंनरेंद्रभवनेपरिशंकनीयंविद्यार्थिनागुरुगृहेनिभृ
तेनभाव्यं।छिद्रेविनाशमुपयांतिहिदुर्विनीताःप्रादोषिकइवदरिद्रगृहेषुदी
पाः॥४॥कालेयथावदधिगतनरपतिकोपाप्युषोवेवृत्तांतः।नृपभवनेगतमूर्त्तिः
संयतवस्त्रःशनैःप्रविशेत्॥५॥अन्यच्च।आसन्नमेवनृपतिर्भजतेमनुष्यं।विद्या
विहीनमकुलीनमसंस्कृतंवा॥प्रायेणभूमिपतयःप्रमदालताश्चयत्पार्श्वतो
भवतितत्परिवेष्टयंति॥६॥अपिच॥कोपप्रसादवाक्यानियेविचिन्वंतिसेवकाः
आरोहंतिशनैःपश्चाद्धुन्वंतंपार्थिवंनुते॥७॥किंच।सुवर्णपुष्पांपृथिवींविचिन्वं
तित्रयोजनाः।शूरश्चकृतविद्यश्चयश्चजानातिसेवितुं॥८॥साचसेवायथाक्रिय

नेन तथा शुश्रूयतां ॥ प्रिया हिताश्च ये राज्ञो ग्राह्यऽवाचो विशेषतः ॥ आश्रयेत्पार्थिवं विद्वा
न्तेन द्वारेणैव चान्यथा ॥ ९ ॥ यो न वेत्ति गुणान्सम्यक्न तं सेवेत पंडित ॥ भवत्याजीव
नेन तस्मात्फले कालेन तदादपि । द्रव्यप्रकृतिहीनोऽपि सेव्यः सेव्यगुणान्वितः ॥ भवत्याजी
वनेन तस्मात्फले काले न तदादपि ॥ ११ ॥ सेवकः स्वामिनं द्वेष्टि सेवकाधमः स्मृतो । आत्मान
न किं द्वेष्टि सेव्या सेव्यं न वेत्ति यः ॥ १२ ॥ राजमातरि देव्यां च कुमारे मुख्यमंत्रिणि पुरोहिते
प्रतीहारे कर्तव्यं राजवत्सदा ॥ १३ ॥ पृष्ठकालेऽथ तो यः स्यात्सदा पृष्ठानुगः पुरः । प्रभुद्वा
रस्थितो हर्म्ये सन्त्वे राजवत्सदा ॥ १४ ॥ जीवेति प्रब्रुवन्प्रोक्तः कृत्याकृत्यविचक्षणः ।
करोति निर्विकल्पं यः स भवेद्राजवल्लभः ॥ १५ ॥ प्रभुः प्रमादजं वित्तं मत्या वे बो

नियोजयेत् । वस्त्राद्यं धारयत्यंगे स० ॥१६॥ श्रोत्रं प्रत्युत्तरं नाह विस्रब्धं प्रभुणा च यत् ।
११ न समीहेत दुश्चैर्यः सं ।१७। अन्तःपुरचरैः सार्द्धं यो न मंत्रं समाचरेत् । न कलत्रैर्न दै-
द्रस्यसे ।१८। मम देहं विभो नित्यमिति मत्वा व्यतिक्रमेत् । न कष्टेष्वपि मर्यादां स० १९
हि विच्छेद्य परो नित्यमिच्छानामिच्छकर्मकृत् । यो नरो नरनाथस्य स० २०। न कुर्या-
न्नरनाथस्य योऽरिभिः सह संगतिं । न निंदां न विवादं च स० ।२१। यो रणे शरणे
यन्मन्यते भयवर्जितः । प्रवासे स्वपुरावासे स० ।२२। हन्ते यो यमदूताभं मद्यं हाला-
हलोपमं । पृष्ठे पश्येद्धारं न्यथाकाराः स० ।२३। करठकश्चाह । कथं भवान् तत्र गत्वा श्रमने
वाकिं वक्ष्यति । तत्राव दुच्यतो । सो ब्रवीत् । उत्तराद् उत्तरं वाक्यं वदतो संप्रजायते । स ११

ऋद्धिगुणसंपन्ना हीना हीनमित्रापरं ॥३८॥ अपि च ॥ अपायसंदर्शनजां विपत्तिमुपायसंदर्शनजां च सिद्धिं ॥
मेधाविनो नीतिगुणप्रयुक्तां पुरः स्फुरंतीमिव दर्शयंति ॥३९॥ कल्पयति येन वृत्तिं सदसि च सद्भिः प्रश
स्यते येन ॥ स गुणस्तेन गुणवता विवर्द्धनीयश्वरस्य ॥४०॥ उक्तं च ॥ अपटुबलस्य तद्रूपायस्य
नेष्टे त्वपराभवं ॥ एवं वसंतो धर्मविपरीतस्ततोऽन्यथा ॥४१॥ करटक आह ॥ दुराराध्या हि राजानः ॥
उक्तं च ॥ भोगिनः कंचुकासक्ताः क्रूराः कुटिलगामिनः ॥ सुरौद्रा मंत्रसाध्याश्च राजानः पन्नगा इव ॥४२॥
विषमाः कठिनात्मानो नीचनीचजलाश्रयाः ॥ हिंस्रैरनुगता नित्यं राजानः पर्वता इव ॥४३॥ नखिनां
च नदीनां च शृंगिणां शस्त्रधारिणां ॥ विश्वासो नोपगंतव्यः स्त्रीषु राजकुलेषु च ॥४४॥ सोऽब्रवीत् ॥ सत्य
मेतत् किंतु ॥ यस्य यस्य हि यो भावस्तस्य तस्य हि तं नरः ॥ अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत् ॥४५॥
सक्रोधे नतिं स्तुतिवचनं तदभिमते प्रेम तद्द्विषि द्वेषः ॥ दानमुपकारकीर्त्तनममंत्रमूलं वशीकरणं ॥४६॥
किंतु ॥ क्रियाधिकं वा वचनाधिकं वा ज्ञानाधिकं वापि नरं विदित्वा ॥ तेनात्मवश्यास्त्वनुसंदधीत प्राज्ञावलं

नंपरिवर्जयेत्॥४७॥ वचस्तत्र प्रयोक्तव्यं यत्रोक्तं लभते फलं॥ स्थायी भवति चात्यंतं रागः शुक्लपटे यथा॥४८॥ ज्ञाना
नवलवीर्येषु मान्यः किंचिन्न योजयेत्॥ नाभाजने प्रयुक्ता विद्या ज्योत्स्नाहिमगिरौ यथा॥४९॥ करटक आह॥ यद्येवम
भिमतं तत्क्ष्मराजपादांतिके॥ शिवास्ते पंथानः संतु॥ यथाभिप्रेतमनुष्ठीयतां॥ अप्रमादस्त्वया कर्तव्यः॥ त्वया
रात्तः समाश्रये॥ त्वदीयस्य शरीरस्य च यं भाग्योपजीविनः॥५०॥ सोपि तं प्रणम्य पिंगलाभिमुखं प्रस्थितः॥ अ
थागच्छंतं दमनकमवलोक्य पिंगलको द्वास्थमब्रवीत्॥ अपसार्यतां वेत्रलता॥ अयमस्माकं चिरंतनो मंत्रि
पुत्रो दमनकोऽव्याहतप्रवेशस्तत्प्रवेश्यतां एष द्वितीयमंडलभागीति॥ अथ प्रविश्य दमनको निर्दिष्टे आ
सने पिंगलकं प्रणम्य उपविष्टः॥ स तु तस्य नखकुलिशालंकृतं दक्षिणपाणिमुपरि दत्वा मानपुरःसरमुवाच॥ अ
पि भवतः शिवं कस्माच्चिराद्दृष्टोसि॥ दमनक आह॥ यद्यपि न किंचित्प्रयोजनं देवपादानामस्माभिः॥ न
दपि प्राप्तकाले च वक्तव्यं॥ यतो न खलु राज्ञामुपयोगकारणं किंचिन्न भवति॥ उक्तं च॥ दंतस्य निष्कोष
णकेन राजन् कर्णस्य कंडूयनकेन वापि॥ तृणेन कार्यं भवतीश्वराणां किं नाम वाक्पाणिमता नरे
ण॥५१॥ तथा च॥ यतो वयं देवपादानामन्वयागता भृत्या आपत्स्वप्यनुगामिनो नास्माकमन्या

२२ 12

२२

गतिरस्ति ॥ उक्तं च ॥ स्थानेष्वेव नियोज्यानि भृत्याश्चाभरणानि च ॥ नहि चूडामणिः पादे प्रभ
वामीति बध्यते ॥ अनभिज्ञो गुणानां यो न भृत्यैः सोनुगम्यते ॥ धनाढ्योपि कुलीनोपि क्र
मायातोपि महीपतिः ॥५३॥ असमैः समीयमानः समैश्च परिहीयमाणसत्कारः ॥ धु
रि वानुयुज्यमानस्त्रिभिरर्थपतिं त्यजति भृत्यः ॥५४॥ अपि च ॥ कनकभूषणसंग्रहणो
चितो यदि मणिस्त्रपुणि प्रतिबध्यते ॥ न स विरौति न चापि न शोभते भवति योजयि
तुर्वचनीयता ॥५५॥ बुद्धिमाननुरक्तोयमभक्तोयमयं शठः ॥ इति भृत्यविचारज्ञो
भृत्यैरापूर्यते नृपः ॥५६॥ यदपि स्वाम्येवं वदति विरान्नृपसे ॥ तत्रापि श्रूयतां का
रणं ॥ सव्यदक्षिणयोर्यत्र विशेषो नोपलभ्यते ॥ न तत्र क्षणमप्यार्यो विद्यमानमति
र्वसेत् ॥५७॥ निर्विशेषं यदा स्वामी समं भृत्येषु वर्तते ॥ तत्रोद्यमसमर्थानामुत्सा

हपरिहीयते ॥५८॥ लोहिताक्षस्य च मणेः पद्मरागस्य चांतरं ॥ यत्र नास्ति कथं तत्र
क्रियते रत्नविक्रयः ॥५९॥ न विना पार्थिवो भृत्यैर्न भृत्याः पार्थिवं विना ॥ तेषां च व्य
वहारोयं परस्परनिबंधनः ॥६०॥ तदपि स्वामिगुणादेव भृत्यविशेषः ॥ उक्तं च ॥ अ
13 श्वः शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च ॥ पुरुषविशेषं प्राप्ता भवंत्ययोग्याश्च योग्या
श्च ॥६१॥ यच्च भृगालोयमिति ममोपरि अवज्ञा क्रियते तदप्ययुक्तं ॥ यतः ॥ कौशे
यं कृमिजं सुवर्णमुपलात् दूर्वापि गोलोमतः पंकात्तामरसं शशांकमुदधेरिंदी
वरं गोमयात् ॥ काष्ठादग्निरहेः फणादपि मणिर्गोपित्ततो रोचना प्राकाश्यं स्वगुणो
दयेन गुणिनो गच्छंति किं जन्मना ॥६२॥ तथा च ॥ मूषिका गृहजातापि हंतव्या स

पकारिणी ॥ उपप्रदानैर्मार्जारो हितवान् प्रार्थ्यतेऽन्यतः ॥ ६३ ॥ अपरञ्च ॥ किं भक्तेनासमर्थेन किं
शक्तेनापकारिणा ॥ शक्तं भक्तं च मां राजन् नावज्ञातुं त्वमर्हसि ॥ ६४ ॥ अधिगतपरमार्थान्
पण्डितान् मावमंस्थास्तृणमिव लघुलक्ष्मीर्नैव तान् संरुणद्धि ॥ अभिनवमदलेखाश्यामग
ण्डस्थलानां ॥ न भवति विसतन्तुर्वारणं वारणानां ॥ ६५ ॥ पिंगलक आह ॥ मा मैवमुच्य
तां ॥ चिरंतनस्त्वमस्माकं मन्त्रिपुत्रः ॥ दमनक आह ॥ देव किमपि वक्तव्यमस्ति ॥ सोऽब्रवी
त् ॥ भद्र यत्ते हृदयस्थं तद् ब्रूहि ॥ सोऽब्रवीत् ॥ उदकग्रहणाय प्रवृत्तस्य स्वामिनः कि
मिह निवृत्यावस्थानं ॥ पिंगलक आकारं प्रच्छाद्याह ॥ दमनक किंचिन्न ॥ सोऽब्रवीत् ॥
देव यद्यनाख्येयं तदा तिष्ठतु ॥ दारेषु किंचित्पुरुषस्य वाच्यं किंचिद्वयस्ये सुतेषु किं

चित्॥सर्वेपितेप्रत्ययिनोभवंतिसर्वेनसर्वस्यचसंप्रकाशं॥४५॥एवमुक्तोपिंगलकश्चिंतयामा
सयोग्योयंदृश्यते॥नूनमनयाम्येतस्यालेनोऽभिप्रायं॥उक्तंच॥सुहृदिनिरंतरचित्तेगुणवति
भृत्येनुवर्त्तिनिकलत्रे॥स्वामिनिशक्तिसमेतेनिवेद्यदुःखंसुखीभवति॥४६॥भोदमनक
शृणोषिमहाशब्दंदूरात्॥साऽब्रवीत्॥स्वामिनशृणोमि॥तत्किं॥पिंगलकआह॥भद्रस्माद्व
नाद्गंतुमिच्छामि॥दमनकआह॥कस्मात्॥पिंगलकआह॥यतोऽस्मद्वने अपूर्वंसत्त्वंकिंचि
त्प्रविष्टं॥यस्यायंमहान्शब्दःश्रूयते॥तदस्यशब्दस्यानुरूपेणसत्त्वेनभाव्यं॥सत्त्वा
नुरूपेणचपराक्रमेणेति॥दमनकआह॥किंशब्दमात्रादेवस्वामीभयमुपैति॥उक्तंच॥
अंभसाभिद्यतेसेतुस्तथामंत्रोप्यरक्षितः॥पैशुन्याद्भिद्यतेस्नेहोवाग्भिर्भिद्यतेकातरः॥४७

14

तन्नयुक्तं स्वामिनः पूर्वं पुरुषोपार्जितं कुलक्रमागतं वनं एकपाद एवपरित्यक्तुं ॥ यतः ॥ चल
त्येकेन पादेन तिष्ठत्येकेन पंडितः ॥ नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ॥ ६८ ॥ अन्य
च्च ॥ इह शब्दा अनेके प्रकाराः श्रूयंते नेतु शब्दमात्रादेव न तु भयकारणं ॥ तद्यथा ॥ म
घस्तनितवेणुवीणापणवमृदंगशंखघंटाशकटकपाटयंत्रादीनां शब्दाः श्रूयंते ॥
न च तेभ्यो भेतव्यं ॥ उक्तं च ॥ अघ स्त्को यवरेदुंच प्राप्तो यस्य न हीयते ॥ धैर्यं प्राप्ते महीयस्य न
स्यातिपराभवं ॥ ६९ ॥ तथा च ॥ दर्शितभयेपि धातरि धीरत्वं नैव चलति धीराणां ॥ शोषितसर
सि निदाघे नितरामेवोद्धतः सिंधुः ॥ ७० ॥ तथा च ॥ यस्य न विपदि विषादः संपदि हर्षो रणे च
धीरत्वं ॥ तं भुवनत्रयकिलकं जनयति जननी सुतं विरलं ॥ ७१ ॥ तथा च ॥ शक्तिवैकल्यन

न्नस्य निःसारत्वाल्लघीयसः ॥ जन्ति नो मानहीनस्य तृणस्य च समां गतिं ॥७२॥ नदेवज्ञात्वा
स्वामिना धैर्यावष्टंभः कार्यः ॥ न शब्दमात्राद्भेतव्यं ॥ उक्तं च ॥ पूर्वमेव मया ज्ञातं पूर्णमेत
द्धि मेदसा ॥ अनुप्रविश्य विज्ञातं यावच्चर्म च दारु च ॥ पिंगलकोऽब्रवीत् ॥ कथमेतत् ॥ दम
नक आह ॥ अस्ति कस्मिंश्चित्प्रदेशे गोमायुः क्षुत्क्षामकंठ आहारार्थं परिभ्रमन् ॥
अरण्यमध्ये नृपस्यायोधनभूमिमपश्यत् ॥ अथ मुहूर्तं यावत्तिष्ठति ॥ तावन्महांतं
शब्दमशृणोत् ॥ तं श्रुत्वा अतीव क्षुभितहृदयः परं विषादमगमत् ॥ अहो कष्टमापति
तं इदानीं विनष्टोऽस्मि ॥ कस्यायं शब्दः किंरूपं सत्त्वमिति यावदन्वेषयति तावद्गिरिशिख
राकारां भेरीं दृष्ट्वाऽचिंतयत् ॥ किमयं शब्दः स्यात् स्वभावज उत परप्रेरित इति ॥ अ

14

यथयदाभेरीवायुनाप्रेरितैस्तृणाग्रैःस्पृश्यते॥तदाशब्दंकरोतीति॥अथ ध्यातः॥स्थीमाले॥सच
तस्याःशब्दसारतांज्ञात्वासमीपमुपश्लिष्टःस्वयंचकौतुकादुभयमुखयोरताडयत्॥हर्षाद्दिम
चिंतयत्॥अहोचिरादेवास्माकमपिभोजनमापतितं॥तन्नूनमेतन्मांसमेदोऽभिपूरितं
भविष्यतीत्येवमवधार्यकस्मिंश्चित्प्रदेशेविदार्यांतःप्रविष्टः॥तच्चपरुषचर्म्मावगुंठि
तं॥ततःकथमपिवनदंष्ट्राभंगःसंजातः॥अथोनिराशीभूतस्तद्दारुचशेषमवलोक्यश्लो
कमपठत्॥कृतेवंभैरवंशब्दंमन्येहंमेदसांनिधिं॥अनुप्रविश्यविज्ञातंयावच्चर्मेवदार
च॥१॥प्रतिनिर्गत्यातल्लीनमहस्याऽब्रवीत्॥पूर्वमेवमयाज्ञातमिति॥अतोहंब्रवीमि॥न
शब्दमात्रादेवक्षोभःकार्यः॥कथा॥पिंगलकआह॥भोममायंपरिग्रहोभयव्याकुलि

तमनाक्पलायितुमेव वांछति ॥ तत्कथय महं धैर्योवष्टंभं करोमि ॥ सोऽब्रवीत् ॥ स्वामिन्नैतेन यांदै
यो ॥ यतः स्वामि शद्रुमाभ्रत्या भवंति ॥ उक्तंच ॥ अश्वः शस्त्रं शास्त्रं वीणा वाणी नरश्च ना
रीच ॥ पुरुषविशेषं प्राप्ता भवंत्ययोग्याश्चयोग्याश्च ॥ पोरुषावष्टंभं तत्त्वा तावदत्रैव परि
पालय ॥ यावदहमेतत्स्वरूपं विज्ञायागच्छामि ॥ ततस्त्वया चिंतं कर्तव्यमिति ॥ पिंगल
क आह ॥ किं तत्र गंतुमुत्सहते भवान् दमनक आह ॥ किं स्वास्वादेशात्सभ्रत्यस्य कृत्य
मस्ति किंचित् ॥ उक्तंच ॥ यतः स्वाम्यादेशात्सुभ्रत्यस्य न भीः संजायते क्वचित् ॥ प्रविशे
न्मुखमाहेयं दुस्तरं वा महार्णवे ॥ ७२ ॥ स्वाम्यादिष्टस्तु यो भ्रत्यः समं विषममेव वा ॥ म
न्यते स विवेर्द्धार्यो न भ्रत्यैः कथंचन ॥ पिंगलक आह ॥ भद्र यद्येवं तत् गच्छ शिवास्ते सं

नुपेयान: ॥ दमनकोपितं प्रणम्य संजीवकसकाशानुसारी प्रतस्थे ॥ अथ दमनके गते भयव्याकु
लितहृदयः पिंगलकश्चिंतयामास ॥ अहो न शोभनं कृतं मया यत्तस्य विश्वासं गत्वात्म
नमभिप्रायो निवेदितः ॥ कदाचिद्दमनकोयमुभयवेतनत्वान्ममोपरि दुष्टः स्याद्वाधि
कारत्वाद्वा ॥ उक्तंच ॥ येभवंति महीपस्य संमानितविमानिताः ॥ भवंति तस्य नाशाय कुलीना अ
पि सर्वदा ॥ ७ ॥ तद्यावदस्य चिकीर्षितं वेत्तुं स्थानांतरं गत्वा प्रतिपालयामि ॥ कदाचिद्द
मनकोपि तमादाय मां व्यापादयितुमागच्छेत् ॥ उक्तंच ॥ न वध्यंते ह्यविश्वस्ता बलिष्ठैरपि
दुर्बलाः ॥ विश्वस्तास्तु प्रवध्यंते दुर्बलैर्बलिनोपि हि ॥ ८ ॥ इत्यवधार्य स्थानांतरं गत्वा
दमनकमार्गमवलोकयन्नेकाकी एवावतस्थौ ॥ दमनकोपि संजीवकसकाशं गत्वा वृष

भोयमिति परिज्ञाय हृष्टमना अचिंतयत् ॥ अहो शोभनमापतितं ॥ अनेनास्य संधिविग्रहद्वा
रेण मम पिंगलको वश्यो भविष्यति ॥ उक्तं च ॥ सदैवापद्गतो राजा भोग्यो भवति मंत्रिणां ॥
अत एव हि वांछंति मंत्रिणः सापदं नृपं ॥७७॥ यथा वांछति नीरोगः कदाचिन्न चिकि
17 त्सकं ॥ न तथापद्रहितो राजा सचिवं नाभिकांक्षति ॥७८॥ एवं विचिंतयन् पिंगलका
भिमुखः प्रतस्थे ॥ पिंगलकोपि तमायांतमवलोक्याकारसंवरणार्थं यथापूर्वम
वतस्थे ॥ दमनकोपि पिंगलकसकाशमागत्य प्रणम्योपविष्टः ॥ पिंगलक आह ॥ भ
द्र किं दृष्टं भवता तत्सत्वं ॥ दमनक आह ॥ दृष्टं स्वामिप्रसादात् ॥ पिंगलक आह ॥ अपि
सत्यं ॥ दमनक आह ॥ किं स्वामिपादानामन्यथा विज्ञप्यते ॥ उक्तं च ॥ अपि स्वल्पम २७

सत्यं यः पुरो वदति भूभुजां ॥ देवानां च विनाशः स्यात् ॥ ध्रुवं तस्य गुरोरपि ॥ तथा च ॥ सर्वदेवमयो
राजा मुनिभिः परिगीयते ॥ तस्मात्तं देववत्पश्येन्न व्यलीकेन कर्हिचित् ॥८०॥ तथा च ॥ स
र्वदेवमयस्यास्य विशेषो भूपतेरयं ॥ शुभाशुभफलं दत्ते सद्यो देवो भवांतरे ॥८१॥ पिंग
लक आह ॥ अथ वा समं दुष्टं भविष्यति भवता ॥ न दीनोपरि महांतः प्रकुप्यंति उक्तं च ॥
तृणानि नोन्मूलयति प्रभंजनो मृदूनि नीचैः प्रणतानि सर्वतः ॥ समुच्छ्रितानेव तरू
न्विबाधते महान्महत्स्वेव करोति विक्रमं ॥८२॥ दमनक आह ॥ मया एवमेवैतद्वि
ज्ञातं यथैवं स्वामी वक्ष्यति ॥ तत्किं बहुना तमेवाहं देवपादानां सकाशमानयामि तच्छ
श्रुत्वा पिंगलको हृष्टवदनकमलः ॥ परां मनसस्तुष्टिमुपागतः ॥ दमनको पिंग

नर्गत्वा संजीवकमादरेण माहूतवान्॥ एह्येहि मुग्ध वृषभ स्वामी पिंगलकस्त्वां व्याहरति॥ किं नि
र्भीको भूत्वा मुहुः २ र्थ नदसीति॥ ततः श्रुत्वा संजीवकोऽब्रवीत्॥ भद्र क एष पिंगलको ना
14 म॥ तच्छ्रुत्वा सविस्मयं दमनकोऽब्रवीत्॥ कथं स्वामिनं पिंगलकमपि न जानासि॥
पुनस्य सामर्थमुक्तरात्॥ फलेन ज्ञास्यति भवान्॥ नन्वयं सर्वमृगपरिवृतो मंडलवट
भ्योसेमानोन्नतचित्तः सत्वधन स्वामी पिंगलकाभिधानो महासिंहस्तिष्ठति॥ तच्छ्रु
त्वा गतायुषमिवात्मानं मन्यमानः संजीवकः परं विषादमगमत्॥ आह च॥ भद्र भगवा
न्साधुसमाचारो वचनपटुश्च दृश्यते॥ यद्यपि मामवश्यं तत्र नयसि॥ ततोऽभयप्रसादः
स्वामिनः सकाशाद्दापयितव्यः दमनक आह॥ भोः सत्यमभिहितं भवता नीतिरेषा

यतः ॥ पर्यंतो लभते भूमेः समुद्रस्य गिरेरपि ॥ न कथंचिन्महीपस्य चित्तांतः केनचित् क्वचित्
॥ ८३ ॥ ततस्त्वं अत्र तिष्ठ यावदहं समयं ज्ञात्वा तत्र पश्चादानयामि त्वं ॥ ततो दमनकः पिंगलक
सकाशं गत्वेदमाह ॥ स्वामिन्नतन्माकृतं सत्वं ॥ स हि भगवतो महेश्वरस्य वाहनवृषभो म
याप्रष्ट इदमाह ॥ महेश्वरेण तुष्टेन कालिंदीपरिसरे शष्पाग्राणि भक्षयितुं समादिष्टो
ऽस्मि ॥ न किं बहुना मम प्रदत्तं भगवता क्रीडार्थं वनमिदं ॥ पिंगलक आह ॥ सभयं ज्ञातम
धुना मया न देवताप्रसादं विना शष्पभोजना निःशंका निर्जने वने ॥ एवं नंदतो भ्रमंति ॥ न
तस्त्वया किमभिहितं ॥ दमनक आह ॥ स्वामिन्मयैतदभिहितं मेतद्वनं चंडिकावाहनस्य पिं
गलस्य विषयीभूतं ॥ तद्भवानभ्यागतः ॥ ततस्तस्य सकाशं गत्वा सौभ्रात्रे स्नेहेन एक

चचरखादनपानक्रियाविहारैकस्थानाश्रयेण कालेन यत्विति ॥ तेनापि सर्वमेतत्सानितयन्नं ॥ उक्तंच ॥
स्वामिनः सकाशादभयदक्षिणा प्रदापनीया ॥ तदत्र स्वामी प्रमाणं ॥ तच्छ्रुत्वा पिंगलकः सहर्ष
मिदमाह ॥ साधु सखे साधु मम हृदयेन सह मंत्रयित्वेवाभिहितं ॥ तद्दत्ता मया तस्याभयदक्षि
णा ॥ परं सोपि मम आर्थे शापथपुरस्सरं ह्यततरमानेतव्यः ॥ तथा साधु चेदमुच्यते ॥ अतः
सारैरकुटिलैः सल्लिष्टैः सुपरीक्षितैः मंत्रिभिर्धार्यते राज्यं सुस्तंभैरिव मंदिरं ॥ ८४ ॥ तथा ॥
मंत्रिणां भिन्नसंधाने भिषजां सान्निपातिके ॥ कर्मणि व्यज्यते प्रज्ञा स्वस्थे को वा न पंडितः ॥
दमनकोपि संजीवकमुद्दिश्य प्रस्थितोऽचिंतयत् ॥ अहो प्रसादसंमुखो नः स्वामी वचन
वशगश्च संवृत्तः ॥ तन्नास्ति धन्यतरो मया समः ॥ यतः अमृतं शिशिरे वह्निः अमृतं प्रिय

दर्शनं ॥ अन्तरे राजसन्मानं अमृतं क्षीरभोजनं ॥ ८६ ॥ अथ संजीवकमासाद्य तत्र स्वयमुवाच ॥
भो मित्र प्रसादितो सो मया भवदर्थे स्वामी अभयप्रदानं च दापितं तत्त्वं विस्रब्धं गम्यतामिति ॥
परं राजप्रसादमासाद्य मया सह समयधर्मेण वर्त्तितव्यं न प्रत्वमासाद्य स्वगर्वतया ॥
अहमपि तव संकेतेन सर्वां राज्यधुरं अमात्यपदवीमाश्रित्योद्धरिष्यामि ॥ ततो द्वयोरपि
राज्यलक्ष्मीर्भोग्या भविष्यतीति यतः ॥ पापर्द्धिवद्धर्मेण विभवाः स्युर्वशे नृणां ॥ नृ-
प्रजान् प्रेरयत्येको हन्त्यन्योऽत्र मृगानिव ॥ ८७ ॥ तथा च ॥ न रञ्जति यो गर्वाद्यथोचितं नृ-
पाश्रितान् ॥ स प्राप्नोति पदभ्रंशं भूपतेर्दन्तिलो यथा ॥ संजीवक आह ॥ कथमेन

नेसोऽब्रवीत् ॥ अस्त्यत्र धरातले वर्द्धमानं नाम नगरं तत्र दंतिलो नाम भांडपतिः सकलपुरनायकः
प्रतिवसति स्म ॥ तेन पुरकार्यं नृपकार्यं च कुर्वता तुष्टिं नीताः सर्वे तत्पुरवासिनो लोकाः ॥
20 किं बहुना ॥ न कोऽपि तादृक् केनापि दृष्टः श्रुतो वा चतुरः ॥ अथवा साध्विदमुच्यते ॥ नरपतिहि
तकर्ता द्वेष्यतां याति लोके जनपदहितकर्ता त्यज्यते पार्थिवेन ॥ इति महति विरोधे वर्तमाने
समाने नृपतिजनपदानां दुर्लभः कार्यकर्ता ॥ ८६ ॥ अथैवं वर्तमानस्य तस्य कदाचित्कन्या
विवाहः संजातः ॥ तत्र तेन समस्तास्तत्पुरनिवासिनो राजसंनिधिलोकाश्च सन्मानपूर्वमा
मंत्र्य भोजिता वस्त्रादिभिश्च सत्कृताः ॥ ततो विवाहानंतरं सांतःपुरो राजा गृहमानीयाऽभ्यर्चिताः ॥
अथ तस्य नरपतेर्गृहमार्जनकर्ता गोरभनामा सते न गृहमायातोऽपि राजगुरुपुरतोऽनुचितस्था राम २०

नेसमयविशेषे दृष्ट्वाश्चर्य्यं चंद्रं दत्वा निःसारितः॥ गोपितस्त्वमिति श्रयमानकलुषितो ऽतः करणो राजाव

पिनमोते॥ कथं मया तस्य भाउपतेः राजप्रसादहानिः कर्त्तव्येत्य चिंतयच्च॥ योह्यपकर्त्तुमशक्तः॥

कुप्यति किमासौस्तत्रस्यानिर्लज्जोलः उत्पतितोपि हि चणकः शक्तः किं भ्राष्ट्रकं भंक्तुं॥८१॥ अथ क

दाचित्प्रभूषे योगनिद्रां गतस्य राज्ञः शय्यांते सन्मार्जनं कुर्वन्निदमाह॥ अहो दंतिलस्य धृष्टत्वं॥

यद्राजमहिषीमालिंगति॥ तत्श्रुत्वा राजा ससंभ्रममुत्थाय तमुवाच॥ भो गोरंभ सत्यमेतद्यत्

त्वया जल्पितं॥ किं देवी दंतिलेन समालिंगिता॥ गोरंभ आह॥ देवरात्रिजागरणेन द्यूतासक्त

तं यामार्जनकर्म कुर्वतो ऽपि मे बलान्निद्रा समायाता॥ तन्न वेद्मि यदभिहितं मया॥ राजा सेर्ष्यं

ऽयतावन्मम गृहे ऽप्रतिहतगतिस्तथा दंतिलोपि॥ तत्कदाचिदनेन देवी तेन समालिंग्यमा

ना दृष्टा भविष्यति॥ उक्तं च॥ यतः॥ वांछति यद्देवमर्त्यो वीक्षते वा करोति वा॥ तत्स्वप्नेपि नरभ्या

सात्तयाधृक्कृतेकरोतिच॥१९॥तथाच्छुभंवायदिवापापंयन्नृणांहृदिसंस्थितं॥सगूढमपितज्ज्ञेयंस्व
प्नवाक्यात्तथामदात्॥२१॥अथवास्त्रीणांविषयेकोऽत्रसंदेहः जल्पंतिसार्द्धमन्येनपश्यंत्यन्यंस
विभ्रमाः॥हृद्गतंचिंतयंत्यन्यंप्रियःकोनामयोषितां॥२२॥तथाच॥नाग्निस्तृप्यतिकाष्ठानां
21 नापगानांमहोदधिः॥नांतकःसर्वभूतानांनपुंसांवामलोचनाः॥२३॥रहोनास्तिक्षणोना
स्तिप्रार्थयितानरः॥तेननारदनारीणांसतीत्वमुपजायते॥२४॥तथाच॥योमोहान्मन्यतेमू
ढोरक्तेयंममकामिनी॥सतस्यावशगोनित्यंभवेत्क्रीडाशकुंतवत्॥२५॥एवंसबहुविधंवि
लप्यतत्प्रभृतिदंतिलस्यप्रसादपराङ्मुखोबभूव॥किंबहुना॥राजद्वारेप्रवेशोनिवारि
तः॥दंतिलोप्यकस्मादेवप्रसादपराङ्मुखमवनिपतिमवलोक्यचिंतयामास॥अहोसाधु
चेदमुच्यते॥कोऽर्थान्प्राप्यनगर्वितोविषयिणःकस्यापदोऽस्तंगताःस्त्रीभिःकस्यनखंडितं शुभ

२२

भुविमः कोनाराज्ञांप्रियः॥कः कालस्यनगोचरांतरगतः कोर्थीगतोगौरवंकोवादुर्जनवागुरासुपति
तः क्षेमेणयातः पुमान्॥१६॥तथाच॥काके शौचंद्यूतकारेषुसत्यंसर्पेक्षांतिः स्त्रीषुकामोपशांतिः॥
क्लीबेधैर्यंमद्यपेतत्वचिंताराजामित्रंकेनदृष्टंश्रुतंवा॥१७॥अपरंमयाअस्यभूपतेरन्यस्यवाक
स्यचित्स्वप्नेपिवाऽनिष्टंकृतंनाऽपिनरस्तमहितं॥तत्किमितिपराङ्मुखोमांप्रतिभूपतिरिति॥१
कदाचकदाचिद्दंतिलंराजद्वारेविष्कंभितमवलोक्यसन्मार्जनकर्त्तागोरभकोद्वार
पालान्विहस्येदमुवाच॥भोभोद्वारपालाराजप्रसाददुर्ललितोयंदंतिलकः स्वयंनिग्रहा
नुग्रहकर्त्ताच॥तदनेननिवारितेनयथाहंतथायूयमप्यर्द्धचंद्रभागिनोभविष्यथ॥
इतिततः श्रुत्वादंतिलकश्चिंतयामास॥नूनमस्यगोरभकस्यचेष्टितं॥अथवासाध्वी

दमुच्यते ॥ अकुलीनोऽपि मूर्खोऽपि भूपालं योऽत्र सेवते ॥ अपि संमानहीनोऽपि स सर्वत्र प्रपूज्यते ॥ ९८ ॥ अ
पि कापुरुषो भीतः स्याच्चेन्नृपतिसेवकः ॥ न थापि न पराभूतिं जनादाप्नोति मानवः ॥ ९९ ॥ ए
२२ वं विलप्य स विलक्षमनाः सोद्वेगः स्वगृहं गत्वा गोरभमाहूय निशामुखे वस्त्रयुगलेन सं
मान्येदमुवाच ॥ भद्र मया त्वं रागवशान्न निःसारितः ॥ यतस्त्वं पुरोहितस्य पुरोऽनुचितस्था
ने समुपविष्टोऽसीत्यपमानितः ॥ सापि स्वर्गराज्यमिव तद्वस्त्रयुगलमासाद्य परं परितोषं
गत्वा तमुवाच ॥ भोः श्रेष्ठीन् क्षांतं मया तत्त्र अस्य संमानस्य अचिरे द्रक्ष्यसि राजप्रसादफ
लं ॥ एवमुक्त्वा स परितोषं विनिर्गतः ॥ साधु चेदमुच्यते ॥ स्तोकेनोन्नतिमायाति स्तोकेना
यात्यधोगतिं ॥ अहो सुसदृशी चेष्टा तुलायष्टेः खलस्य च ॥ १०० ॥ ततश्च अन्येद्युः स गो

राम
२२

एभो राजन्कुले गत्वा योगनिद्रां गतस्य भूपतेः संमार्जनक्रियां कुर्वन्निदमाह ॥ अहो विवेकोऽस्मद्भूपतेर्यः
शरीरे षोत्सर्गमाचरन् विभिन्ति भक्षणं कुरुते ॥ ततस्तच्छ्रुत्वा सविस्मयमभ्युत्थाय तमुवाच ॥ रे रे गोरंभ
किमप्रस्तुतं वदसि ॥ गृहकर्मकरं मत्वा न त्वां व्यापादयामि ॥ किं त्वया कदाचिदहमेवंविधं क
र्म समाचरन्दृष्टः ॥ सोऽब्रवीत् ॥ देव द्यूतासक्तेन तया रात्रिजागरणेन मम संमार्जनं कुर्वतोऽपि व
लान्निद्रा समनुयागता ॥ तत्र यज्ञोल्पितं तत्र वेद्मि ॥ तत्प्रसादं करोतु स्वामी मम निद्रापरवशस्य ॥
राज्ञा चिंतितं मया तावदाजन्मतोऽपि एवंविधं कर्म कुर्वता विभीषिकानभक्षिता ॥ तद्व्याममा
यं व्यतिकरोऽनेन मूढेन संभाव्यो व्याहृतस्तथादं तिलस्यापीति निश्चयः ॥ तन्मया न युक्तमाचरि
तं ॥ यत्तस्य वराकोऽसन्मानेन वियोजितः ॥ ततो हं कुपुरुषाणामेवंविधं संभाव्यते ॥ तद्भावेन राज
कृत्यानि योरकृत्यानि वसर्वाणि शिथिलतां व्रजन्ति ॥ एवमनेकधा विनिश्चित्य दंतिलं समाहू

यनिजांगाभरणानिवस्त्राणिचं संयोऽन्यस्वाधिकारेनियोजयामास ॥ अतोहं ब्रवीमि ॥ नसज्जयत्तियो
गर्वादिति ॥ तृतीयाकथेति ॥ संजीवकआह ॥ भद्रसत्यमेतद्भवताभिहितं ॥ तदेनत्कर्त्तव्यमि
ति ॥ एवमभिहितेदमनकस्तंसमादायपिंगलकसकाशमागच्छति ॥ आहच ॥ देवसमयास
मानीतः संजीवकोऽधुना ॥ देवः प्रमाणं ॥ संजीवकोपितंसादरंप्रणम्याग्रतः सविनयंस्थि
तः ॥ पिंगलकोपितस्यपीनवृत्तायतननखकुलिशालंकृतं दक्षिणपाणिमुपरिदत्वास
मानपुरस्सरमब्रवीत् ॥ अपिभवतः ॥ शिवं कुतस्त्वमस्मिन्विजनेवनेनिवसतीति ॥ एवं
पृष्टेसंजीवकोयथावृत्तमेवात्मनः सार्थवाहवर्द्धमानाद्विवियोगंसमाख्यातवान् ॥ ए
तच्छ्र ॥ श्रुत्वापिंगलके ॥ नाभिहितोवयस्यनभेतव्यं ॥ मद्भुजपरिरक्षितेऽस्मिन्वनेयथेप्सि

न मुच्यते ॥ अन्यच्च भवतामत्समीपविहारिणा अजस्रं भवितव्यं ॥ यत्कारणं बह्वपायमिदं
वनं अनेकरौद्रसत्वसंकुलत्वादिति ॥ संजीवकेनाभिहितं ॥ यथा देव आज्ञापयति ॥ एव
मुक्त्वा स मृगाधिपो यमुनाकच्छमवतीर्य प्रकाममुदकपानावगाहनं कृत्वा स्वैरप्रचार
पुरवने प्रविष्टः ॥ एवं तयोः प्रतिदिनं परस्परप्रीतिपरयोः कालोऽतिवर्त्तते ॥ संजीवकेना
प्यनेकशास्त्राधिगतबुद्धिप्रागल्भ्येन स्तोकैरेवाहोभिर्मूढमतिरपि पिंगलको धीमान् कृ
तः ॥ अरण्यधर्माद्वियोज्य ग्रामधर्मेषु नियोजितः ॥ किं बहुना ॥ प्रत्यहं संजीवकपिंगलकौ के
वलं रहस्यं मिथो मंत्रयेते ॥ शेषः सर्वोपि मृगपरिजनो दूरीकृतस्तिष्ठति ॥ तौ च शृगालौ प्र
वेशमपि न लभ्यते ॥ अन्यच्च ॥ सिंहपराक्रमाभावात् ॥ सर्वोपि मृगजनस्तौ च शृगालौ

द्रुधां व्याधिवाधितार्एकां दिशमाश्रित्य स्थिताः ॥ उक्तं च ॥ यतः फलहीनं नृपं भृत्याः कुलीनमथवो
न्नतं ॥ संत्यज्यान्यत्र गच्छन्ति शुष्कं वृक्षमिवाण्डजाः ॥१॥ तथा च ॥ अपि संमानसंयुक्ताः कुलीनभ
क्तितत्पराः ॥ वृत्तिभंगान्महीपालं त्यजन्त्येव हि सेवकाः ॥२॥ अन्यच्च ॥ कालातिक्रमणं वृत्तेर्यो न कु
24 र्वीत भूपतिः ॥ कदाचित्तं न मुंचंति भर्त्सिता अपि सेवकाः ॥३॥ यावन्समस्तमप्येतत्यरस्सरंभ
क्षणार्थं सामादिभिरुपायैर्लिख्यति ॥ तद्यथा ॥ देशानामुपरि क्ष्मापा आतुराणां चिकित्स
काः ॥ वणिजो ग्राहकाणां च मूर्खानामपि पंडिताः ॥४॥ प्रमादिनां तथा चौरा भिक्षुका गृह
मेधिनां ॥ गणिका कामिनां चैव सर्वलोकस्य शिल्पिनः ॥५॥ सामाद्यैः सज्जितैः पाशैः प्रती
क्षन्ते दिवानिशं ॥ उपजीवंति शक्त्या हि जलजा जलजानिव ॥६॥ तौ च करटकदमनकौ

स्वामिप्रसादरहितौ क्षुत्क्षामकंठौ परस्परं मंत्रयते ॥ तत्र दमनको ऽब्रवीत् ॥ आर्य करटक आवां ता
वत्प्रधानतां गतौ ॥ एष पिंगलकः संजीवकवचनानुरक्तः स्वव्यापारपराङ्मुखः संजातः
सर्वोपि परिजनः ॥ कोपि कुत्रापि गतः ॥ तस्मात्किं क्रियते करटक आह ॥ यद्यपि त्वदीयव
चनं न करोति स्वामी तद्स्वदोषनाशाय वाच्य एव ॥ उक्तं च ॥ यतः ॥ अश्रृण्वन्नपि बोध
व्यो मंत्रिभिः पृथिवीपतिः ॥ यथा स्वदोषनाशाय विदुरेणांविकासुतः ॥ तथा च ॥ मदोन्म
त्तस्य भूपस्य कुंजरस्य च गच्छतः ॥ उन्मार्गं वाच्यतां यांति महामात्राः समीपगाः ॥ ८ ॥ यत्त्व
यैव शष्पभोजी स्वामीनामरुसंयोजितः ॥ तत्र स्वहस्तेनांगाराः कर्षिताः ॥ दमनक
आह ॥ सत्यमेतत् ॥ ममायं दोषो न स्वामिनः ॥ उक्तं च ॥ यतः ॥ जंबुको हुडयुद्धेन वयं

25

चाषाढभूतिना ॥ दूतिका परकार्येण त्रयो दोषाः स्वयंकृताः ॥ करटक आह ॥ कथमेतत् ॥ सो
ऽब्रवीत् ॥ अस्ति कस्मिंश्चिद्देशे विविक्तप्रदेशे मठायतनं ॥ तत्र परिव्राजको देवशर्म्मा ना
म प्रतिवसति स्म ॥ तस्यानेकयजमानप्रदत्तसूक्ष्मवस्त्रविक्रयवशात्कालेन महती वि
त्तमात्रा संजाता ॥ ततः स न कस्यचिद्विश्वसिति ॥ नक्तंदिनं कक्षान्तरात्तां मुंचति ॥ अथ साधु
चेदमुच्यते ॥ अर्थानामर्जने दुःखमर्जितानां च रक्षणे ॥ नाशे दुःखं व्यये दुःखं धिगर्थाः
कष्टसंश्रयाः ॥ १ ॥ अथाषाढभूतिनामा परवित्तापहारी धूर्त्तो मात्रां तस्य कक्षान्तरगतां
लक्षयित्वा व्यचिंतयत् ॥ कथं मयास्येयं मात्रा हर्त्तव्येति ॥ तदत्र मठे तावत् दृढशिलासंच
यवशाद्भित्तिभेदो नास्ति ॥ उच्चैस्तरत्वाच्च द्वारे प्रवेशो नास्ति ॥ तदेनं वचनैर्विश्वास्याहं छा

त्वनांप्रजामीति ॥ येनविश्वस्तोममहस्तगतोभवति ॥ उक्तंच ॥ यतः निःस्पृहोनाधिकारीस्यान्ना
कामीमंडनप्रियः ॥ नाविश्वस्तः प्रियंब्रूयात् ॥ स्फुटवक्तानवंचकः ॥ एवंविनिश्चित्यतस्या
न्तिकमुपगम्य ॥ ॐनमः शिवायेतिब्रुवाणः साष्टांगंप्रणम्यतंप्रश्नयमुवाच ॥ भगवन्नसा
रोयंसंसारोगिरिनदीवेगोपमंयौवनं ॥ तृणाग्निसमंजीवितव्यं ॥ अभ्रच्छायासदृशाभोगाः
स्वप्नसदृशः पुत्रमित्रभृत्यकलत्रवर्गसंबंधः ॥ एतन्मयाज्ञातंसम्यक् ॥ तत्किंकुर्वतोमेसं
सारसमुद्रोत्तरणंभविष्यति ॥ ततश्रुत्वादेवशर्म्मासादरमाह ॥ वत्सधन्योसित्वं ॥ यत्प्रथमे
वयसिएवंविरक्तिभावः ॥ उक्तंच ॥ यतः ॥ प्रथमेवयसियः शांतः सशांतइतिमेमतिः ॥
धातुषुक्षीयमाणेषुशमः कस्यनजायते ॥ १२ ॥ तथाच ॥ आदौचित्तेततः कायेसतांसंजा

२०

यनेनरा॥ असन्तोच पुनः कायेनैव चिन्तेकदाचन॥२२॥ यश्च संसारसागरोत्तरणाय योपायं पृ
च्छति न तच्छ्रूयतां॥ शूद्रो वा यदि वान्योपि चांडालो वा जटाधरः॥ दीक्षितः शिवमंत्रेण सभस्मां
गो द्विजो भवेत्॥२३॥ षडक्षरेण मंत्रेणाप्येकमपि स्थिरं॥ लिंगस्य मूर्द्ध्नि यो दद्यान्न स भू
योपि जायते॥२४॥ न तच्छ्रुत्वाप्याचार्यस्मृतिस्तत्यादेवशर्मोत्थाय तमाचार्यमित्याह॥ भवाकल्
प्तदानेन न हि मम प्रसादः क्रियतामिति॥ देवशर्म्मा प्राह॥ वत्स अद्य रात्रौ तेकरिष्यामि॥ पर
रात्रौ मठमध्ये न प्रवेष्टमिति॥ यत्कारणं निःसंगता यतीनां प्रशस्यते॥ तव मम कापि च॥ उक्तं
च॥ यतः॥ दुर्मंत्रान्नृपतिर्विनश्यति यतिः संगात्सुतो लालनाद्विप्रोऽनध्ययनात्कुलं कु
तनयात्शीलं खलोपासनात्॥ मैत्री चाप्रणयात्समृद्धिरनयात्स्नेहः प्रवासाश्रयात् राम
२६

स्त्रीमद्याद्दनवेस्सरणादपिदृष्टिस्यागात्यसादाहूनं ॥ ९५ ॥ तत्त्वयाव्रतग्रहणहृद्दंमठद्वारेत्वृणकुटी
रकेशयितव्यमिति ॥ स आह ॥ भगवन्नादेशः प्रमाणं ॥ परत्रहितेनमेप्रयोजनं ॥ अथयतंशयनंस
मयेदेवशर्म्मादीक्षानुग्रहंदत्वाशिष्यतामनयात् ॥ सोऽपिहस्तपादावमर्द्दनेनपत्रिकानयनादि
कृयाचपरिचर्ययातंपरंपरितोषमनयत् ॥ तथापिकक्षांतरान्मात्रांनमुंचति ॥ किंवाविषंप्रय
च्छामि ॥ किंवापशुधर्मेणव्यापादयामि ॥ इत्येवंचिंतयतस्तस्यदेवशर्म्मणःशिष्यपुत्रःकश्चि
द्ग्रामादामंत्रणार्थंसमायातः प्राहच ॥ भगवन्पवित्रारोहणविषयेममगृहमागम्यतामिति ॥
ततश्रुत्वादेवशर्म्माआषाढभूतिनासहप्रस्थितः ॥ अथैवंतस्यगच्छतोऽग्रेकाचिन्नदीसमा
यातातांदृष्ट्वामात्रांकक्षांतरादवतार्यकंथामध्येगुप्तांनिधायदेवार्च्चनानंतरंआषाढ

ढभूतिमिदमाह॥ आषाढभूते यावदहं शरीरोत्सर्गं कृत्वा समागच्छामि॥ तावदेषा कंथा योगेश्व
रस्य सावधानेन रक्षणीयेत्युक्त्वा गतः॥ आषाढभूतिरपि तस्मिन्नदर्शनीभूते मात्रामादा
य सत्वरं प्रस्थितः॥ देवशर्म्मापि छात्रगुणगणाऽनुरंजितमना सुविश्वस्त उपविष्टो यावत्ति
27 ष्ठति॥ तावत्तत्र उरणयूथमध्ये हुडुयुगलमपश्यत्॥ अथ रोषवशात् हुडुयुगलस्यापसरं
कृत्वा भूयोपि समुपेत्य ललाटपट्टाभ्यां प्रहरतो भूरि रुधिरं पतति तच्च दृष्ट्वा श्राणाप्रतिव
द्धचित्तः पिशितलोलुपतया गोमायुस्तयोरन्तरे स्थित्वा रुधिरमास्वादयति॥ देवशर्म्मा
पि तदालोक्य व्यचिन्तयत्॥ अहो मन्दमतिरयं जंबुको यदि कथमप्यनयोः संघट्टे पति
ष्यति तन्नूनं मृत्युमाप्स्यतीति वितर्कयामि॥ अथान्यस्मिन्प्रस्तावे तथैव रक्तास्वादन

लेल्यान्नापसृतः॥ तयोः शिरः संपाते पतितो मृतश्च॥ ततो देवशर्म्मा आह॥ जंबुको हुडयुद्धे
नेति॥ देवशर्म्मापि तं शोच्यमानो मात्रामुद्दिश्य प्रस्थितः॥ शनैः शनैः यावदागच्छति ताव
दाषाढभूतिं न पश्यति॥ ततश्चौत्सुक्यात् शौचं विधाय यावत्कंथामालोकयति॥ तावन्मा
त्रां न पश्यति॥ ततश्च हा हा मुषितोस्मीति जल्पन् भूतले मूर्छया निपपात॥ ततश्च क्षण
स्तेन नो लब्धा भूयोपि समुत्थाय फूत्कर्तुमारब्धः॥ भो भो आषाढभूते क्व मां वंचयित्वा
गतोसि देहि मे प्रतिवचनं॥ एवंविधं विलप्य तस्य पदपद्धतिमन्वेषयन् वयं चाषाढभूतिने
ति प्रजल्पन् शनैः शनैः प्रस्थितः॥ अथ गच्छन् देवशर्म्मा सभार्यं कौलिकमेकं मद्यपान
कृते समीपवर्त्तिनि नगरे प्रचलितमवलोक्य प्रोवाच॥ भो भद्र वयं सूर्योढा अतिथय

स्नवांतिके प्राप्ताः ॥ अत्र ग्रामे कमपि न ज्ञानीमः ॥ तत् गृह्यतामतिथिधर्म्मः ॥ उक्तं च ॥ यतः ॥ प्र
णामश्चातिथिः सायं सूर्यो द्वो गृहमेधिनां ॥ स्तो यातस्य देवत्वं प्रयांति गृहमेधिनः ॥ २६ ॥ तथा
च ॥ तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ॥ सतामेतानि हर्म्येषु नोच्छिद्यंते कदाच
28 न ॥ २७ ॥ तथा च ॥ स्वागतेनाग्नयः प्रीता आसनेन शतक्रतुः ॥ पादशौचेन गोविंदो अना
द्यैन प्रजापतिः ॥ २८ ॥ कौलिकोपि तत् श्रुत्वा भार्यामाह ॥ प्रिये गच्छ त्वमेनमतिथिमादा
य गृहे प्रति ॥ चरणशौच भोजन शयनादिभिः सन्तृप्य तत्रैव तिष्ठ ॥ अहं तवकृते प्रभू
तं मद्यमांसमानेष्यामि ॥ इत्येवमुक्त्वा प्रस्थितः ॥ सापि भार्या पुंश्चली तमादाय प्रहसि
तवदना देवदत्तं मनसि चिंतयंती गृहे प्रति प्रतस्थे ॥ अथ वा मा धिदम् अत्ते ॥ दुर्दिवसे

राम
९८

ऽमितपत्रेहुः संचारासु नगरवीथीसु ॥ यस्यार्थविदेशगमने परमसुखं जघनचपलायाः ॥२८॥ पर्यं
के स्वास्तरणे पतिमनुकूलं मनोहरं शयने ॥ तृणमिव लघु मन्यंते कामिन्यश्चौर्यरतलुब्धाः ॥२९॥ २
नयाच ॥ कुलपतनं जनगर्हां बंधनमपि जीवितव्यसंदेहं ॥ अंगीकरोति कुलटा सततं परपु
रुषसंसक्ता ॥३०॥ अथ गृहं गत्वा देवशर्म्मणो भग्नखट्वा समर्प्येदमाह ॥ भो भो भगवन्यावद
दहं सखी यामादभ्यागतो संभाष्य ह्युतमागच्छामि ॥ तावत्त्वयाऽस्मद्गृहेऽप्रमत्तेन भा
व्यं ॥ एवमुक्त्वा श्रृंगारं विधाय यथा वदेवदत्तमुद्दिश्य व्रजति तावत्तद्भर्त्ता संमुखो मदविह्व
लांगो मुक्तकेशः पदे २ स्खलन्गृहीतमद्यभांडः ॥ समभ्येति ॥ तं च दृष्ट्वा सा कृतत्वरं भ्या
द्युघ्यत्व गृहं प्रविश्य मुक्त्वा श्रृंगारा यथापूर्वं मभवत् ॥ कौलिकस्तां पलायमानां कृतश्रृं

गारामवलोक्य आगेवकर्णो परंपरयानस्याः परवादश्रवणात्क्षुभितहृदयः ॥ क्रोधवशात्तो गृहे
प्रविश्यतामुवाच ॥ आः पापे पुंश्चलि कथमस्थिता क्षिप्ता प्रोवाच ॥ अहं त्वत्तः काष्ठादागतान
कुत्रचिदपि निर्गता ॥ तत्कथं मद्यपानवशात्स्वप्नस्तत्वं वदसि ॥ अथवा साधु इदमुच्यते ॥ वैक
लं धरणीपातं नित्यानुचितजल्पनं ॥ सन्निपातस्य चिन्हानि मद्यं सर्वाणि दर्शयेत ॥ ४४ ॥
तथा च ॥ करस्याधोऽवरत्यागस्तेजोहानिः सरागता ॥ वारुणीसंगजावस्था भानुनाप्यनु
भूयते ॥ ४५ ॥ सोपि तत् श्रुत्वा प्रतिकूलवचनेवैषविपर्ययमवलोक्य तामाह ॥ पुंश्चलि वि
रकालं मे श्रुतः एवंतत्सवापवादं ॥ तदद्य स्वयं जातप्रत्ययः ॥ तत्तवापि यथोचितं निग्रहं करोमि ॥
एवमभिधाय लगुडप्रहारैस्तां जर्जरितदेहां विधाय स्तंभेन सह दृढबंधनेन बद्धा म

द्विकलांगो निद्रावशमगमत्॥ एतस्मिन्नंतरे तस्याः सखी नापिती कौलिकं निद्रावशं
विज्ञाय आगत्यैवेदमाह॥ सखि स देवदत्तस्मिन् स्थाने प्रतीक्षते। तत् शीघ्रमागम्यतां॥
सा प्राह॥ बद्धममावस्थां तत्कथं गच्छामि॥ ब्रूहि गत्वा तं कामिनं यदस्मिन्नवसरे॥
त्वया कथं समागम इति॥ नापिती प्राह॥ सखि मा मैवं वद नायं कुलटाधर्मः॥ उक्तं च॥ य
तः॥ विषमस्थं स्वादुफलग्रहणव्यवसायनिश्चयो येषां॥ उष्ट्राणामिव तेषां तन्मन्येण
शितं जन्म॥२४॥ तथा च॥ संदिग्धे परलोके जनापवादे च जगति बहुचित्रे॥ स्वाधीने प
ररमणे धन्यस्तारुण्यफलभाजः॥२५॥ अन्यच्च॥ यद्यपि न भवति देवावात्पुमान्विरूपोपि
बंधकी रहसि॥ भव्यमपि न तदपि कष्टान्निजकांतं सा भजत्येव॥२६॥ साऽब्रवीत्॥ यद्येवं तत्को

30

घयकथं गच्छामि॥ दृढबंधनबद्धास्मि॥ सन्निहितस्थायिपापात्मपति॥ नापिती प्रोवाच॥ सखि
मदविह्वलोऽयं सूर्यकरस्पृष्टः प्रबोधं यास्यति॥ तदहमात्मानं त्वदवस्थानेन निधाय त्वां मुंचा
मि॥ ततस्त्वं देवदत्तं संभाव्य द्रुततरमागच्छेति॥ तथैव तथानुष्ठिते कालिकेऽत्र कस्मिंश्चित्क्ष
णे किंचिन्निवृत्तकोपः समुत्थाय मदवशात्तामाह॥ हे परुषवादिनि यदि अद्यप्रभृति गृह
न्निःक्रमणं न करोषि॥ परुषवचनं वदसि॥ तत्त्वां मुंचामि॥ ततो नापिती स्वरभेदभयान्न
किंचिदूचे॥ सोऽपि भूयस्तां न देवाह॥ अथ सा प्रत्युत्तरं यावन्न प्रयच्छति॥ तावत्स प्रकुपि
तः तीक्ष्णशस्त्रमादाय तस्याः नासिकामच्छिनत्॥ आह च॥ पुंश्चलि तिष्ठेदानीं त्वां भू
यस्तोषयिष्यामीति जल्पन् पुनर्निद्रावशमुपगतः॥ देवशर्मापि वित्तनाशात्क्षुत्क्षा

राम
३०

नवेष्टेन च निद्रालसेन सर्वं स्त्रीचरितं अपश्यत्॥ नापितीकौलिकभार्यायच्छं देवदत्तेन सह सुरत
सौख्यमनुभूय कस्मिंश्चित्क्षणे स्वगृहमभ्येत्य तां नापितीमिदमाह॥ अयि शिवे भवत्या नाथे
यायात्मा मम गतायाउत्थित आसीत्॥ नापिती प्राह॥ शिवे नापितीकौ विनाशे यथा शरीरस्य॥ न
द्रुतं मुंच मां बंधनात्॥ यावन्नायं प्रतिबुध्यते॥ येन स्वगृहं गच्छामि॥ अन्यथा भूयोऽप्ययं दु
ष्टनरं कर्णछेदादिनिग्रहं करिष्यति॥ अथ यर्बंधुकी नापितीं बंधनान्मुक्त्वा यथा पूर्वं
भूत्वा सा स्वयमिदमाह॥ धिग् महामूढ कोऽयं मां महासतीं यति व्रतां धर्षयितुं व्यंगयि
तुं वा समर्थः॥ ततः भृ एवं तु लोकपालाः॥ आदित्यचंद्रावनिलोऽनलश्च द्यौर्भूमिरा
पो हृदयं यमश्च॥ अहश्च रात्रिश्च उभे च संध्ये धर्मो विजानाति नरस्य वृत्तं॥ तद्यदि

दिममसतीत्वमस्ति न देते देवा भर्तृयोऽपि नाहं करूपयां नासिकां कुर्वन्तु ॥ अथवा मनसापि यदि
परपुरुषोऽभिलषितस्तन्मां भस्मसान्नयन्तु ॥ इत्येवमुक्ता भर्योऽपितमाह ॥ भो दुरात्म
३। न्पश्यपश्य मसतीत्वप्रभावेण नाहंगवनासिका संजाता ॥ अथो लुकमादाय यावत्पश्यति
तावत्ताहगे वनासिकारक्तप्रवाहस्य भूतले महान्दृष्टः ॥ ततः सविस्मयमनास्ताम्
म्युष्य बंधनाद्वाङुशतैः परितोषितवान् ॥ देवशर्मापि तत्सर्वमवलोक्य विस्मितम
नाऽइदमाह ॥ उशनावेद यच्छास्त्रं यच्च वेद बृहस्पतिः ॥ स्त्रीबुद्ध्या न विशिष्यते तस्माद्र
क्ष्याः कथं हि ताः ॥ २८ ॥ अन्यच्चं माहं तम्माया मूर्खत्वमनिलोभनता ॥ अशौचं निर्दयत्वं
च स्त्रीणां दोषाः स्वभावजाः ॥ २९ ॥ नातिप्रसंगः प्रदमदासकार्येन छेद्दलं स्त्रीषु

राम
३१

विवर्द्धमानं॥अतिप्रसक्तैःपुरुषैर्यतस्ताःक्रीडंतिकाकैरिवलूनपक्षैः॥३०॥मधुनिव
तिष्ठतिवाचियोषितांहृदयेहालाहलंमहद्विषं॥अतएवनिपीयतेऽधरोहृदयंमुष्टिभिरेवता
ड्यते॥३१॥आवर्त्तःसंशयानामविनयभवनंपत्तनंसाहसानांदोषाणांसन्निधानंकप
टशतमयंक्षेत्रमप्रत्ययानां॥दुर्ग्राह्यंयन्महद्भिर्नरवरवृषभैःसर्वमायाकरंडंस्त्रीय
न्त्रंकेनलोकेविषममृतयुतंधर्मनाशायसृष्टं॥३२॥कार्कश्यंस्तनयोर्दृशोस्तरल
तालीकंमुखेश्लाघ्यतेकौटिल्यंकचसंचयेचवचनेमांद्यंत्रिकेस्थूलता॥भीरुत्वंहृदये
सदैवकथितंमायाप्रयोगःप्रिये॥यासांदोषगणोगुणोमृगदृशांताःस्युःपशूनांप्रि
याः॥३३॥एताहसंतिचरुदंतिचकार्यहेतोर्विश्वासयंतिचपरंनविश्वसंति॥तस्मा

न्तरेण कुलशीलसमन्वितेन नार्यः स्मशानघटिका इव वर्जनीयाः ॥७४॥ व्याकीर्णकेशरक
रालमुखा मृगेंद्रा नागाश्च भूरिमदराजिविराजमानाः ॥ मेधाविनश्च पुरुषाः समरेषु
शूराः स्त्रीसन्निधौ परमकापुरुषा भवंति ॥७५॥ तथा च ॥ अंतर्विषमया ह्येता बहिश्चै
व मनोरमाः ॥ गुंजाफलसमाकारा योषितः केन निर्मिताः ॥७६॥ एवं तस्य परिव्रा
जकस्य चिंतयतो निशा महता कृच्छ्रेणातिवक्रमा ॥ सा च दूतिका छिन्ननासिका स्व
गृहे गत्वा चिंतयामास ॥ किमिदानीं कर्तव्यं ॥ कथमेतन्महाछिद्रं मावरणीयं ॥ अस्य
षेवं चिंतयंत्या भर्त्ता राजकुले कार्यवशात्पर्युषितः ॥ प्रत्यूषे च गृहमभ्ये
त्य द्वारि स्थितो पि विविधपौरकृत्योत्सुकः तया तामाह ॥ भद्रे शीघ्रमानीयतां क्षु

रभांडंयेनपौरकर्म्मकरणायगछामि॥सापिछिन्ननासिकाप्रत्युत्पन्नमतिर्गृहाभ्यंतरस्थि
तैवतदभिमुखंक्षुरमेकंप्रेषयामास॥नापितोपिसमग्रक्षुरभांडासमर्प्येणक्रोधाविष्टः
संतस्याःसंमुखमेवक्षुरंप्रक्षिप्तवान्॥अथान्यस्मिन्व्यतिकरेसादुष्टाऊर्द्ध्वौबाहूवि
धायफूत्कर्तुमानागेहान्निश्चक्राम॥अहोपापेनानेनममसदाचारवर्त्तिन्याःपश्यतना
सिकाछेदोविहितः॥तत्परित्रायध्वं॥एतस्मिन्नंतरेराजपुरुषाःसमभ्येत्यतंहृदप्रहा
रैर्जर्जरीकृत्यदृढबंधनेनबद्ध्वातयाछिन्ननासिकयासहधर्म्माधिकरणस्थानंनी
नवंतः॥ततःसएवसभ्याधिकरणिकैः॥किमिदंवैशसंसमाचरितं॥अथासौशि
स्मयमानोपियदानोत्तरंप्रयच्छति॥तदातेसभासदःशास्त्रानुगतमूचुः॥भि

३३

न्नस्वर्गसुखवर्णः॥ पौक्तिनहृष्टिः समुतिनतेजाः॥ भवतिपापंकृत्वास्वकर्मसमन्वितः प्रलयः॥३७
तथाच॥ अयाति स्वबलितैः पादैर्मुखवैवर्ण्यसंयुतः॥ ललाटस्वेदभाग्भूरिशाद्गं दंभायते
वचः॥३८॥ कंप्यमानमधोदृष्टीपापंप्राप्तस्तदानरः॥ तस्मात्प्रयत्नात्परिहेयश्चिन्हैरेतैर्वि
चक्षणैः॥३९॥ अन्यच्च॥ प्रसन्नवदनो हृष्टः स्पष्टोवाचामरोयहकः॥ सभायांवक्तिसाम
र्थः सोचकृंमोनरः शुचिः॥४०॥ तदेयदुष्टचरित्रोहृष्यते॥ स्त्रीधर्मेणाद्व्यम इति श्रुत्वा
यामारोप्यतामिति॥ भो अन्यायेनैषवराकोनापितोवध्यते साधुसमाचारः॥ स्तूतं श्रू
यतांममवाक्यं॥ जंबुकोहुडुयुद्धेन वयं चाषाढभूतिना॥ दूतिकपरकार्येण त्रयोदो
षाः स्वयंकृताः॥ अथते सभ्यास्तमूचुः॥ भो भगवन् कथमेतत्॥ ततश्च देवशर्मा

तेषांत्रयमपिसविस्तरंन्यवेदयत्॥अथतत्श्रुत्वातेसर्वैविस्मितमनसोनापितंविमुच्य
एवंप्रोचुः॥अवध्योब्राह्मणोबालःस्त्रीतपस्वीरोगभाक्च॥तदस्याःस्वकर्म्मवशाद्देवना
सिकाछेदःसंवृत्तस्ततोराजनिग्रहःकर्णछेदःकार्यः तथानुष्ठितेदेवशर्म्मापिव
स्त्रान्तहृयेनस्वहृदयंसंस्थाप्यस्वकीयमठायतनंगमत्॥अतोहंब्रवीमि॥जंबुकोहु
डुयुद्धेनस्यादिकथा॥८॥करटकआह॥अथैवंविधेन्यतिकरेकिंकर्त्तव्यमद्वयोः॥दमन
कःअब्रवीत्॥एवंविधेपिसमयेममबुद्धिस्फुरणंभविष्यति॥येनसंजीवकंप्रभोर्विश्ले
षयिष्यामि॥अपरंवास्मत्स्वामीमहतिव्यसनेवर्त्ततेस्वामीपिंगलकदमनकआह॥
सुहृहिसव्रव्यसनानिभवंति॥तथाहि॥स्त्रियोऽक्षामृगयापानंवाक्पारुष्यंचयं

वर्मं ॥ महच्चेदं दुःसाध्यमर्थहरणमेव च ॥ १ ॥ एकमेवेदं व्यसनं प्रसंगात्सर्वेषामागमिति ॥ करट
कः पृच्छति ॥ किमेतदेवेदं व्यसनमाहोस्विदन्यान्यपि भवन्ति ॥ दमनकः कथयति ॥ न वि
हं पंच मूलव्यसनानि ॥ करटकस्त्वाह ॥ कस्तेषां विशेषः सोऽब्रवीत् ॥ अभावः प्रदोषः प्र
संगः पीडनं गुणप्रतिलोमकं चेति ॥ तत्र प्रथमं तावत् स्वाम्यमात्यजनपददुर्गकोशदंडमि
त्राणामेकतमस्याप्यभावेऽभावात्स्वामवर्गतया ॥ यस्तु बात्यप्रकृतयोऽन्तःप्रकृतयो वा
प्रत्येकशो युगपद्वा प्रकुप्यंति ॥ तद्व्यसनं प्रदोष इति ॥ प्रसंगः पूर्वमुक्त एव ॥ स्त्रियोऽक्षा
मृगया पानमित्यादि ॥ तत्र स्त्रियोऽक्षा मृगया पानमिति कामजो वर्गः ॥ वाक्पारुष्यादिः
कोपजो वर्गः ॥ तत्र कामजैर्व्यवहितः कोपजेषु प्रवर्त्तते ॥ स्तवो य एव कामजो वर्गः ॥ को

फलं त्रिविधोऽपि विशेषवचनेनोच्यते ॥ पराभिद्रोहबुद्धेरसमीक्षितमसद्दोषस्याविष्करणं वा
क्पारुष्यं ॥ निर्दयो वधबंधच्छेदविधिरनुचितो दंडपारुष्यं ॥ निरनुक्रोशतो वित्तलोभो
ऽर्थपारुष्यं ॥ एवं सप्तधा प्रसंगव्यसनं भवति ॥ पीडनं पुनष्षड्धा ॥ दैवान्मुदकव्याधिम
रकाविनाशदुर्भिक्षामरीवृष्टिर्भवति ॥ अतिवृष्टिरवासरो वा वृष्टिरुच्यते ॥ नरेंद्रव्यसनं
पीडनं नाम मंतव्यं ॥ अथ गुणप्रातिलोमकमुच्यते ॥ यदा संधिविग्रहयानासनसंश्रय
द्वैधीभावानां षण्णां गुणानां प्रातिलोम्येन वर्त्तते ॥ संधौ प्राप्ते विग्रहं विग्रहे च संधिं करो
ति ॥ एवं शेषेष्वपि गुणेषु प्रातिलोम्येन यदा वर्त्तते ॥ तद्व्यसनं प्रतिलोमकमिति ॥
न द्वयमसत्स्वामीपींगलको मुख्यतमे अभावव्यसने वर्त्तते ॥ यतः संजीवकेन वशी

स्थः सन् अमात्यादिषु षड्गुणेषु च एकतमस्यापि चिंतां न करोति ॥ प्राप्यभोजी यस्मिन् स्वेच्छया
एवं च तेन किं बहुना प्रलपितेन सर्वथा पिंगलकः संजीवकाद्वियोज्य एवेति ॥ यतः प्रदी
पाभावात् प्रकाशाभावः ॥ करटक आह ॥ असमर्थो भवान् तत् कथं वियोजयिष्यति ॥ सो
ऽब्रवीत् ॥ भद्र युक्तमिदं ॥ उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः ॥ काक्या कनकसूत्रे
ण कृष्णसर्पो निपातितः ॥ करटक आह ॥ कथमेतत् ॥ सोऽब्रवीत् ॥ अस्ति कस्मिंश्चित् प्र
देशे महान् न्यग्रोधपादपः तत्र वायसदंपती कृताश्रयौ प्रतिवसतः ॥ तदपत्यानि च
जातानि ॥ तद्वृक्षविवरानुसारी कृष्णसर्पोऽसंजातपक्षाण्येव भक्षयति ॥ अथासौ वाय
सोऽपि तेनापकारिणि निर्वेदेनापि चिरपरिचितं न्यग्रोधतरुं परित्यज्यान्यवृक्षान्न गंतुं न

याक्रेयि॥कुतः॥त्रयः स्थानं न मुंचंति॥काकाः कापुरुषा मृगाः॥अपमाने त्रयो यांति॥सिं
हाः सत्पुरुषा गजाः॥४१॥अथान्यदा सा काकी भर्तुः पादयोर्निपत्याब्रवीत्॥स्वामि
न् बहून्यपत्यानि ममानेन दुष्टसर्पेण भक्षितानि॥नेदानीमपत्यदुःखेन पीडिता
ज्ञानाम्येव क्वापि गच्छामि तदन्यवृक्षांतरमाश्रयावः॥कुतः॥नास्त्यारोग्यसमं मित्रं॥
नास्ति व्याधिसमो रिपुः॥न चापत्यसमः स्नेहो न च दुःखं क्षुधासमं॥४२॥अन्यच्च॥य
यस्याः क्षेत्रं नदीतीरे भार्या च परसंगता॥गृहे सर्पो भयं तस्य कथं स्याच्चित्तनिर्वृतिः॥४३॥
तद्द्वावां प्राणसंशये वर्तावहे॥अथ काको भृशं दुःखपरिभागोऽनदत्॥भद्रे चिरोषि
तावयमस्मिन् वृक्षे तन्न शक्नुमः परित्यक्तुं यतः॥अगतो मृगो न जीवति पाश्चुलके

तथा समुद्रं वा ॥ मुंचति विरोधितत्वाज्जन्मनयनेनाप्यमानेपि ॥ ७७ ॥ किं पुनरस्य दुरात्मनो मत्काश
शत्रोरुपायेन वधं करिष्यामि ॥ काक आह ॥ मित्र नैन महाविचार्ययं सत्यं सत्कथमस्यापकरिष्य
सि ॥ सोऽब्रवीत् ॥ भद्रे यद्यप्यहमसमर्थोऽस्यापकारकरणे ॥ तथापि मम सुहृदो विद्वां
सो नीतिशास्त्रकुशला विद्यन्ते ॥ तेषां सकाशं गत्वोपायमुपलभ्य तथा करिष्ये ॥ तथा वि
शादेव दुष्टबुद्धिरसौ विनश्यति ॥ इति सामर्थ्यमभिधाय ततो वृक्षान्तरं गतः ॥ तदधो नि
वासिनं प्रियसुहृदं गोमायुं स विनयमाहूय सर्वं तदात्मदुःखं न्यवेदयत् ॥ उक्तं वा
च ॥ भद्र किमेवं सति प्राप्तकालं मन्यसे ॥ अपत्यनाशो नावयोर्दम्पत्योर्विघात एव ॥ शृ
गालस्त्वाह ॥ भद्र परिमार्जितं मयात्र नासुखं त्वया कार्यं ॥ आसन्नोऽस्य दुरात्मा

नशंसन्वान्सखलु कृष्णसर्पः॥ यतः॥ अपकारिषु मापापं चिंतयत्वं कदाचन॥ स्वयमेव
पश्यंति कूलजाता इव द्रुमाः॥५५॥ श्रूयते च॥ भक्षयित्वा बहून्मत्स्यानुत्तमाधममध्यमा
न्॥ अतिलौल्याद्बकः कश्चिन्मृतः कर्कटकग्रहात्॥ वायसः पृच्छति कथमेतत् सोऽब्रवी
त्॥ अस्ति कस्मिंश्चित्सरस्तीरे एकदेशे बकः सवृद्धभावात्सुखोपायं मत्स्यभक्षण
वृत्तिमाकांक्षन् तस्यैव सरस्तीरे धृतिपरितमात्मानं दर्शयन् समीपगतानपि मत्स्यान्न भ
क्षयन्नवस्थितः॥ तत्र मत्स्यानां मध्ये एकः कुलीरकः प्रतिवसति॥ स आसन्नो भूत्वाऽब्र
वीत्॥ माम किमद्याहारक्रिया न क्रियते॥ यथा प्रत्यहमिति॥ ततोऽब्रवीत्॥ यावदहं मत्स्या
दनेन पुष्टः सुखिनस्वाद्यान् कालो मया सुखास्वादयता सुखेन नीतः॥ अनेन परे

युष्माकमभ्याहितमेष्यतीति कारणान्मम रत्याभावे सुखजीवनवृत्तेरस्याच्छेदो भविष्यती
हं त्यविमनाः सोऽब्रवीत् ॥ माम कीदृशं अभ्याहितं तदिति ॥ बक आह ॥ अद्य मया बहूनां म
त्स्यबंधनानां सरस्समीपे नातिक्रमतां व्याहारः श्रुतः ॥ यथा बहुमत्स्यमिदं मनोरमं सरः ॥ त
च्छ्वः परश्वो वा जालं प्रक्षिप्यते ॥ अद्य पुनर्नगरस्समीपे न्हदस्मास्मिन्नेव गच्छामः ॥ ए
वमवस्थिते युष्मास्वविनष्टेषु वृत्तिच्छेदादहमपि विनष्ट एवेति ॥ शोके ॥ नाद्य आहा
रनिवृत्तोस्मि ॥ तस्य दुष्टभाषितं श्रुत्वा सर्वैस्तैर्जलचरैः प्राणभीतैर्विज्ञप्तो बको यथा ॥
मातुल भ्रातः सखे परित्राणे तत्कृत्ये न एवापायः श्रूयते ॥ ततऽ एवोपायोपि लभ्यते ॥
तदर्हस्यस्मान् अस्मान् मृत्युमुखात्त्रातुं बक आह ॥ अहोऽहमसमर्थो मानुषैः स

विरोधं कर्त्तुं ॥ किंपुनर्ममशक्तिरस्त्यस्माऽत्तलाशयादन्यमगाधंजलाशयंसंक्रामयितुं ॥
ततस्तैः कृतकवचनव्यामोहितचित्तैरभिहितं मामम सखेनिः कारणवंधो प्रथमतरं
नयत्ति ॥ किमिह न श्रुतं भवता ॥ स्थिरहृदयेनिहितरागाः सज्जनतयासंस्कारं तइहस
कृतं ॥ स्वजीवितमपि संतो नगणयंति मित्रार्थे ॥ ६६ ॥ अथसौ दुष्टमतिर्मीनमवह
स्य स्वचित्तेन संरूढः एवं समर्थिवान् ॥ यदेते मया मत्स्या वुभुक्षिः सर्वेकैव प्पाः हेताः सुखे
नैव भक्षणीय इति विचिंत्य मत्स्यगणविज्ञप्तं प्रतिज्ञाय वंद्यासमुद्धृत्य अन्यत्र प्रदेशे
शिलातले सैकदेशोपरिनीत्वाऽभक्षयत ॥ प्रत्यहमहरहर्षमोहितो च गछति ॥ स
मेत्यवचनात्तरम्यः योऽपि मिथ्याहं संदेशैर्विश्वासयत्ति ॥ एकदा कुलीरको मरणभयेनो

द्विग्नमनामुक्त्वा कुलीरस्तमभ्यर्थितवान् ॥ माम मामपि मृत्युमुखात्त्रातुमर्हसि ॥ ततो बकश्चिंतया
मास ॥ निर्विण्णोऽस्म्यनेनैकेन मत्स्यपिशितेन एतर्हीयं विशिष्टं विशेषमपूर्वमास्वादया
मि ॥ इति विचिंत्य कुलीरमुत्क्षिप्य व्योम्नि निगतः ॥ सर्वाण्यपि भःस्थानानि परिहृत्य यावत्तत्स्था
न प्रशिलामस्यां सर्वे जलचराः स्वस्थाः संजाताः ॥ तत्त्वमपि शीघ्रं तत्र स्वस्थो भव ॥ त
तः कुलीरेणाधोऽवलोकयता यावद्दृष्टा मत्स्यास्थिकूटकरालावध्यशि
ला ॥ अथाचिंतयत् ॥ अहो शत्रुरूपाणि मित्राणि मित्ररूपाश्च शत्रवः ॥ ज्ञायते
कार्यसिद्ध्यर्थं केचिल्लोके विचक्षणाः ॥ ६७ ॥ तथा ॥ वरं विहारः सह पन्नगैः कृतः
शठ्यस्तभिर्वा रिपुभिः सहोषितं ॥ अधर्मयुक्तैश्चपलैरपंडितैर्न पापमित्रैः सह

वर्त्तितुं समं ॥४८॥ तज्जलिनाऽनेन पूर्वं खल्वेनेमत्स्या येषामिमे परितोऽस्थिकूटास्तत्किंप्राप्तकालं
मयाधुनाकर्त्तव्यं ॥ अथवा किमत्र चिंत्यते गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ॥ उत्पथ
प्रतिपन्नस्य दंडो भवति शाश्वतं ॥४९॥ तथा ॥ तावद्भयस्य भेतव्यं यावद्भयमनागतं ॥ आग
तं तु भयं दृष्ट्वा प्रहर्त्तव्यमशंकितैः ॥५०॥ अतो यावदेष मामत्र न क्षिपति तावदेव चतुर्भि
रपि विधाराणाग्रे ग्रीवायां गृह्णामि ॥ अयन थापिकृते गंतुमारब्धो बकः ॥ तथापिमोरख्यी
न कुलीरसंदंशाग्रहणप्रतिविधानमजानन् शिरश्छेदमवाप्तवान् ॥ कुलीरोपि मृ
णालसदृशीं बकग्रीवां गृहीत्वा शनैः शनैर्मत्स्यांतिकमेव तचैव सरस्यागतः ॥ तैश्चा
भिहितो भ्रातः कस्मात्त्वमागत इति ॥ अथासौ तच्छिरश्चिह्नं दर्शयन्नाहऽ सर्वतोऽ

ग्रे नीतजलचरास्तेन मिथ्यावादेन वंचयित्वा नानि हूरे शिलातले प्रक्षिप्य भक्षिताः ॥ तन्मयाप्या
युः शेषतया विश्वस्तया न कोयमिति ज्ञात्वा तस्य ग्रीवा समानीता ॥ तदलं संभ्रमे
ण सर्वजलचराणां क्षेमं भविष्यतीति ॥ अतोहं ब्रवीमि ॥ भक्षयित्वा बहून्मत्स्यानि
39 ति ॥ कथा ॥ वायसः प्राह ॥ भद्र कथय कथं स दुष्टसर्पो वधमेष्यतीति ॥ शृगाल
आह ॥ गच्छतु भगवान् किंचित्स्थानं महेश्वराधिष्ठितं तस्मात्कस्यापि धनिनः कनक
सूत्रं हारं वा प्रतिमादिनो गृहीत्वा तत्र प्रक्षिपन्तु ॥ यथा स सर्पः तद्ग्रहणे वध्यते ॥ अ
थ काकः काकी च तन्मरणात्मनेच्छयोत्पतितौ ॥ ततश्च काकी किंचित्सरः प्राप्य या
वत्पश्यति तन्मध्ये कस्यचिद्राज्ञोऽन्तःपुरं जलासन्नन्यस्तकनकसूत्रमुक्ताहार

वस्त्राभरणं जलक्रीडां करोति ॥ अथ सा वायसी कनकसूत्रमेकमादाय तद्वृक्षाभिमुखी प्रतस्थे ॥
ततश्च कंचुकिनो वर्षधराश्च तं नीयमानं विलोक्य गृहीतलगुडाः सत्वरमनुययुः ॥ काको
ऽपि सर्पकोटरे कनकसूत्रं प्रक्षिप्य सुदूरमवस्थिता ॥ अथ राजपुरुषा यावत्तं वृक्ष
मारोहन्ति ॥ तावत्कोटरगतः कृष्णसर्पः प्रसारितभोगश्चास्ते ॥ अथ तं लगुडप्रहा
रैर्हत्वा कनकसूत्रमादाय यथाभिलषितं स्थानं गताः ॥ वायसदंपती च ततः प
रं सुखेन वसतः ॥ अतोऽहं ब्रवीमि ॥ उपायेन हि तत्कुर्यादिति ॥ कथा ॥ तथा च ॥ उपे
क्षितः क्षीणवलोऽपि शत्रुः प्रमाददोषात्पुरुषैर्मदांधैः ॥ साध्योऽपि भूत्वा प्रथ
मं ततोऽसाध्यतां व्याधिरिव प्रयाति ॥ ५९ ॥ न त्र किंचिदिह बुद्धिमतामसाध्य

40

मस्तीत्स्त्वंच॥ यतः यस्यबुद्धिर्बलंतस्यनिर्बुद्धेस्तुकुतोबलं॥ वनेसिंहोमदोन्मत्तःजंबु
केननिपातितः॥५१॥ करटकआह॥ कथमेतत्॥ दमनकःकथयति॥ अस्तिकस्मिंश्चि
द्वनेदुर्द्दशेमदोन्मत्तोमेरमतिनामासिंहः॥ सचाजस्रमेवमृगोच्छेदनंकुरुते॥ मृग
स्यदुःखस्यनसहन्ते॥ अथतद्वनजाःसर्वेसारंगवराहमहिषगवयशशकादयो
मिलित्वादीनाननानामहीतलावसक्तजानवः प्रणनशिरसःसविनयास्तंमृगपतिं
विज्ञाययन्तुमारब्धाः॥ अलंदेवपरलोकविरुद्धेनअतिनृशंसेननस्तिःकारणास
र्वसत्वोच्छेदनकर्म्मणाकृतेन॥ श्रूयतेच॥ एकस्यजन्तनोऽर्थेमूढाःकुर्वन्ति॥ या
निपापानि॥ जनयंतितानिदुःखंतेयाजन्मानरसहस्रं॥५२॥ तथा॥ अपवादोभ

६०

वेद्येनयेनचाप्रत्ययोभवेत्॥नरकेगम्यतेयेननतद्धुथकथयाचरेत्॥५३॥पुनश्च॥सर्वास्त्रविनिधा
नस्यकृतघ्नविनाशिनः॥शरीरकस्यापिकृतेमूढाःपापानिकुर्वते॥५४॥तदेतत्तज्ज्ञात्वा
मास्मत्कुलोच्छेदनेकुलंमहीमियत्कारणं॥वयमेवस्वामिनएकेकंवर्णचरंवारकेण
स्थानस्थितस्यवाहरार्थेप्रत्यहंप्रेषयिष्यामः॥एवंसतिदेवस्तकोयवत्तेरस्मज्ज्ञातेस्य
विच्छेदोनभवति॥तदेवंराजधर्मोऽनुष्ठेयतां॥उक्तंच॥शनैःपानैश्चयोराष्ट्रमुपभुं
क्तेयथाबलं॥रसायनमिवस्मायःसपुष्टिंपरमांव्रजेत्॥५५॥अज्ञाद्यप्रजामोह
द्योहन्यात्पृथिवीपतिः॥तस्यैकाजायतेतृप्तिर्नद्वितीयाकथंचनः॥५६॥फलार्थीन्ट
पतिर्लोकान्पालयेयत्नमास्थितः॥दानमानादितोयेनमालाकारोऽङ्कुरानिव॥५७॥